

# नन्दनवनकल्पतरुः

११

शासनसम्राजामिह समुदाये मेरुपर्वतोपमे ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

: सङ्कलनम् :

कीर्तित्रयी

उत्तरायणम्

वि.सं. २०६०

Jain Education International For Private & Personal Use Only www.jainelibrary.org



# नन्दनवनकल्पतरुः

११

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

: सङ्कलनम् :

**कीर्तित्रयी**

उत्तरायणम्

वि.सं. २०६०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनवनकल्पतरु: ॥ एकादशी शाखा ॥
(संस्कृतभाषामयं अयन-पत्रम् ॥)

सङ्कलनम् : कीर्तित्रयी ॥

प्रकाशनम् : **श्रीजैनग्रन्थप्रकाशनसमिति:**, खंभात ॥

वि.सं. २०६०, ई.सं. २००४

मूल्यम् : संस्कृतसाहित्यरुचि: ॥

प्राप्तिस्थानम् : **श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर**
१२, भगतबाग शेठ आणंदजी कल्याणजीनी पेढी समीप,
पालडी, अमदावाद - 380007 दूरभाष : 6622465

सम्पर्कसूत्रम् : **''विजयशीलचन्द्रसूरि:''**
C/o. Atul H. Kapadia
A-9, Jagruti Flats,
Behind Mahavir Tower,
Paldi, Ahmedabad-380007
दूरभाष : 6688879

मुद्रण : **'क्रिष्ना ग्राफिक्स'**, नारणपुरा गाम, अमदावाद ॥
दूरभाष : 079 - 7494393

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रास्ताविकम्

वर्तमानः युगः अयं चिन्तन-लेखन-विचार-भाषणप्रधानः युगः अस्ति । कतिकतिविषयेषु कियत् कियत् वा चिन्त्यते उच्यते च इत्यत्र न अस्ति अनभिज्ञता कस्य अपि । उत्तमः एषः प्रयासः मार्गः वा यत् वयं विचाराणां लेखन-कथनादिरूपेण परस्परम् आदानप्रदानेन सत्यस्य उद्घाटने प्रयत्नशीलाः स्मः । एवं सति अपि एकः प्रश्नः सततम् उद्वेजयति यत् एतावति भवति सत्यपि किमर्थं मनुष्यः क्षीणतेजाः अनुभूयते ? केन कारणेन अस्माकं तेजः सततं क्षीयमाणम् एव दृश्यते ? इति ।

सर्वे अपि सर्वं घटमानं निरीक्षन्ते तत्रगतं शोभनम् अशोभनं च अपि समीक्षन्ते । पश्चात् स्व-स्वविचारानुगुणं दृष्ट्यनुरूपं च तत् अभिव्यक्तम् अपि कुर्वन्ति, लेखनेन भाषणेन वा । पश्चात् किम् ? न किम् अपि । पुनः अपि अरहट्टघटीन्यायेन अपरिवर्तितम् एव सर्वं यथापूर्वं प्रचलति; पुनः का अपि घटना, तन्निरीक्षणम्, समीक्षणम्, विवेचनम्.... इति । अनन्तः अयं क्रमः । एतत् दृष्ट्वा अपरः अपि प्रश्नः समुपतिष्ठते यत् किं वयं विचारशीलाः उत विचारमूढाः ? विचारशीलः फलनिरपेक्षं न किम् अपि आचरति परं विचारमूढः तु निष्फलम् एव प्रवर्तते, विचारेषु एव सः मग्नः इव तिष्ठति । वर्तमानकाले एतादृशां विचारमूढानाम् एव साम्राज्यं सर्वत्र प्रसृतं दृश्यते । तेषां कोलाहले तु विचारशीलानां शब्दरवः विलीनाति । एतादृश्यां स्थितौ कः नाम एनं प्रश्नं पुरस्कृत्य चिन्तयेत् यत् कथं नाम वयं हीनतेजसः भवामः ? इति । सर्वे अपि परस्य विषये अङ्गुलिनिर्देशेन किम् अपि सूचयितुम् उत्सुकाः किन्तु स्वविषये न कः अपि । परोपकारिणः खलु वयम् ? किन्तु अद्य तु स्वोपकारः एव उपकारकः न परोपकारः । यथा वयं विचारशूराः तथा एव आचारशूरैः अपि अस्माभिः भवितव्यम्, तदा एव विच्छायतां गता अस्माकं तेजस्विता पुनः प्रादुर्भविष्यति न अन्यथा । एवम् एव च संस्कृतस्य संस्कृतेः वा कृते क्रियमाणं किम् अपि अर्थवत् फलवत् च अपि भविष्यति । किन्तु प्रथमं तावत् परिवर्तनं स्वस्मिन् एव करणीयम्, एतेन एव 'दीपात् दीपशतम्' इव सर्वम् अपि तेजस्विनं प्रकाशमानं च अनुभविष्यामः । कः खलु अत्र प्रथमः भवेत् ?

आचाररहितैः केवलं विचारैः न कः अपि तेजस्वितां प्राप्तुं शक्नुयात् । इति शम् ।

वि.सं. २०६०

कार्तिकशुक्ला पञ्चमी, चेन्नई

**कीर्तित्रयी**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ दैवेन वा तत्करयोग एव ॥

(॥ पादपूर्तिरूपं अष्टकम् ॥)

आ. विजयप्रद्युम्नसूरिः

परःसहस्रा गुरुगौतमीया, शिष्या नवीना मुनिभावमाप्त्वा ।
सर्वेऽपि ते केवलरत्नमापु-**दैवेन वा तत्करयोग एव** ॥१॥

क्रूरत्रिकेणाऽधमपालकेन, निष्पीडिताः स्कंदकसूरिशिष्याः ।
समस्तकर्मक्षयतः शमाप्ता, **दैवेन वा तत्करयोग एव** ॥२॥

तस्यां क्षपायां प्रभवादिचौराः, पत्न्यश्च तास्तज्जनकादयोऽपि ।
जम्बूकुमारेण सहैव दीक्षिता, **दैवेन वा तत्करयोग एव** ॥३॥

आदर्शगेहे भरतेन प्राप्तं, ज्ञानं परं भावनया तदौच्चैः ।
तदादि याऽभूत् सदृशी परम्परा, **दैवेन वा तत्करयोग एव** ॥४॥

बुद्ध्याकरेणाऽभयमन्त्रिणा समं, कुर्वन्ति ये मैत्र्यमनाविलाशयम् ।
भवन्ति भव्या भविनः किलैते, **दैवेन वा तत्करयोग एव** ॥५॥

श्रुतं श्रुते यत् किल विस्मयावहं, ये शेरते वज्रमुनीशसन्निधौ ।
ते तत्समं यान्ति परत्र लोके, **दैवेन वा तत्करयोग एव** ॥६॥

जिनाय दाता जिनतो ग्रहीता, कदाऽप्यभव्यो न भवेन्नु भव्यः ।
अनादिकालान्नियमश्चकास्ति, **दैवेन वा तत्करयोग एव** ॥७॥

यशस्विनः सद्गुरुतोऽत्र विद्यां, गृह्णन्ति ये ते भविनोऽविलम्बम् ।
यशोऽधिगच्छन्ति शशाङ्कशुभ्रं, **दैवेन वा तत्करयोग एव** ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वाचकानां प्रतिभाव:

**अरैयर् श्रीरामशर्मा**
नं-१०, जानकीरामनिलयम्
औट हाउस् १. श्रेणी, सिरुरपार्क रोड्
मल्लेश्वरम्, बेंगलूरु- ५६०००३

श्रीरामशर्मा विजयशीलचन्द्रमुनिं स्तुवे ।
नन्दनवनकल्पतरौ यत् कीर्तित्रयी धृता ॥१॥

प्रहितं पत्रमेकं तु पक्षात् पूर्वं मया तु तत् ।
प्राप्तं स्यादिति मन्येऽहं त्वया स्याद्वादलाञ्छन ! ॥२॥

लेखनीयं किमप्यत्र लिखित्वा प्रेष्यतामिति ।
कीर्तित्रय्या प्रणुन्नोऽहं यदृच्छोपनतं त्विह ॥३॥

आप्राकृतप्राकृतयो-र्भाषया विलिखामि यत् ।
सोढव्यमूढकरणैः तरणैर्व तरङ्गितम् ॥४॥

नन्दनवनकप्पतरू फुरत्फुरंतेहिं दिव्वसद्देहिं ।
दूरे एव्व जणाणां आकारणयेव्व दिसइ सोहग्गम् ॥५॥

[ नन्दनवनकल्पतरुः स्फुरत्स्फुरद्भिर्दिव्यशब्दैः ।
दूरे एव जनानाम् आकारणयेव दिशति सौभाग्यम् ॥ ]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभाव:

वैराग्यभक्तिनीत्यादिगुणैस्सर्वज्ञमानिता ।
नन्दनवनकल्पतरोः शाखा नवमी शुभा ॥६॥

जराजिण्णो देहो हवइ खु किसो भत्तभरिओ
विराओ जो निच्चं हवइ परिदिट्ठे वि विसये ।
सराओ राओ सो हरिअ सअलं भूतलमलं
परालोअे लोअे जिअइ सुहपुण्णो उवरि अ ॥७॥

[ जराजीर्णो देहो भवति खलु कृशो भक्तभरितो
विरागो यो नित्यं भवति परिदृष्टेऽपि विषये ।
सरागो राजा स हृत्वा सकलं भूतलमलं
परालोके लोके जीवति सुखपूर्णः उपरि च ॥ ]

इति श्रीरामशर्मा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वाचकानां प्रतिभावः

M.A. Ravindran
Saraswati Nilayam
Subramaniyam Puram
Palghat City-P.O.
Palakhad - 678014

हे उदारात्मन् !

नन्दनवनकल्पतरुः इत्यस्य अयनपत्रस्य नवमी शाखा कृपया प्रेषिता अत्र प्राप्ता । धन्यवादः ।

तदयनपत्रं कुतूहलेन मया पठितम् । सर्वाः कृतयः मह्यम् अतीव अरोचन्त ।

एकैकायाः रचनायाः अन्ते दत्तानि सुभाषितानि सुन्दराणि हि । दृढकागदे सुन्दरलिप्या मुद्रिता अयनपत्रिका इयं पुनः पठनाय सुरक्षिता अस्ति ।

भूयोभूयः धन्यवादाः ।

इति भवदीयः रवीन्द्रः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वाचकानां प्रतिभाव:

श्री:

अयि संस्कृतसंस्कृत्योरनन्यनायकमुनीश्वरा: श्रीसूरीश्वरा: कीर्तितकीर्तयश्च !

श्रमणसंस्कृतिसौरभवासिता विशदवैदिकसंस्कृतिसङ्गता ।<br>
भरतभूर्विभवोर्जितसाहिती फलति नन्दनकल्पतरौ श्रिया ।।१।।<br>
सुरगवी कलिपङ्कमुपेयुषी क्वचिदसौ यदि मज्जनशङ्किता ।<br>
भरतशूरसुतास्तपसा धिया परमया परिपान्ति सनातनीम् ।।२।।<br>
विजयशीलशशीद्धमुनित्रयीं कृतमतिं समवेक्ष्य सरस्वती ।<br>
स्मितसितांशुविभासितवल्लभं किमिह कल्पतरुं कृतवत्यसौ ।।३।।<br>
दशमसंख्यकशाखया पुनर्नवलया तरुरुत्सवभावित: ।<br>
स पुरुषार्थचतुष्टयशेवधिर्जयति सूरिभिरात्तयशा निधि: ।।४।।<br>
अध्यात्मसारानुगम: प्रसन्न आचार्यसूरिशुभवासनोत्थ: ।<br>
तत्पादपूर्तिश्च तथाष्टकञ्च पुनन्ति चात्मानमनूनशान्त्या ।।५।।<br>
प्रीत्युपालम्भयोर्दुग्धगरलाभ्यां हितं हरत् ।<br>
गुरुपास्तिवचस्तस्य श्रीधुरन्धरसन्मुने: ।।६।।<br>
जयशिवगौरीसपर्या त्रिवेणीकवेरभिदधाति हृदयम् ।<br>
शिवगौरीगङ्गावनौ कथं भक्तचेतो नाऽभिराजताम् ।।७।।<br>
ब्रह्मानन्देन्द्रदृब्धं रङ्गेऽपि नागानन्दनवनीतम् ।<br>
सरसभाषया सचित्रं मनोविनोदायाऽलं सुधियाम् ।।८।।<br>
आप्राकृतान्तं समे चाऽन्ये नवनवदिशो दिशन्तोऽपि ।<br>
संस्कृतलेखन्या खलु साम्प्रतमनवद्या: प्रबन्धा: ।।९।।<br>
अनवरतमभिनवं रसं प्रतिशाखमभिख्यापयन् श्यामल: ।<br>
कल्पतरु: सत्तरुण: कामं रसिकमावर्जयन् भाति ।।१०।।

मुनिवर्येषु प्रणामाभिनन्दनाबद्धाञ्जलि:

**सुरेन्द्रमोहनमिश्र:**

कुरुक्षेत्रविश्वविद्यालये संस्कृतपालिप्राकृतविभागाध्यापक: ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वाचकानां प्रतिभावः

**डॉ. रूपनारायण पाण्डेयः**
एम्-II / ३३०
राज्यशिक्षा संस्थान कॉलोनी, एलनगञ्ज
प्रयागः उ.प्र. २११००२

मान्याः

सादरं प्रणामाः

तत्रभवद्भिः प्रहितः नन्दनवनकल्पतरुः (दशमः) मया अधिगतः ।

अत्र डॉ. राजेन्द्र मिश्रस्य "जय शिव ! गौरि ! जननि ! जय गङ्गे !" इति कविता वाराणस्याः वैदुष्यपरम्परां संस्मारयति, तस्याः सांस्कृतिकं च गौरवं गायति । आचार्य धर्मधुरन्धरसूरेः "अध्यात्मसारानुगमः" सरल भाषया अध्यात्मतत्त्वं विशदीकरोति । स्वामिश्रीब्रह्मानन्देन्द्रसरस्वतीस्वामिनः "अहिंसा-तत्त्वअनुष्ठानं च" "नागानन्दनवनीतम्" इति रचनाद्वयं सिद्धान्तेन व्यवहारेण रूपकेण च अहिंसायाः याथार्थ्यं प्रस्तौति ॥ "नागानन्दनवनीते" नागानन्दरूपकं भागवतादिपुराणगतकथां च अनुसृत्य अहिंसायाः रम्या प्रतिष्ठा विहिता ! अन्याः अपि रचनाः हृदयं प्रसादयन्ति ।

सन्धिराहित्यस्य साहित्यस्य प्रकाशनस्य विचारः संस्तुत्यः अस्ति, किन्तु समासादिषु यत्र सन्धेः अनिवार्यता विद्यते सा कथम् अपि न उपेक्षणीया इति चिन्तनीयम् ।

जयतु संस्कृतं संस्कृतिश्च ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| अध्यात्मसारानुगमः | आ. धर्मधुरन्धरसूरिः | १ |
| अष्टादशपापस्थानकालोचनाशतकम् ॥ | आ. विजयहेमचन्द्रसूरिः | २३ |
| स्वाध्यायः | | |
| योगबिन्दु दोहनम् ॥ | मुनिरत्नकीर्तिविजयः | ३५ |
| नमि-प्रव्रज्या | मुनिकल्याणकीर्तिविजयः | ७० |
| आस्वादः | | |
| चिन्तनधारा | मुनिरत्नकीर्तिविजयः | ७३ |
| साम्प्रतचिन्तनम् | शास्त्री व्रजलालः उपाध्याय | ७६ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| पत्रम् | मुनिधर्मकीर्तिविजयः | ७८ |
| अनुवादः स्वभावदर्शनम् | मुनिकल्याणकीर्तिविजयः | ८५ |
| प्राज्ञपुरुषस्य उत्तराः | मुनिकल्याणकीर्तिविजयः | ८६ |
| कथा अहो ! बुद्धिमत्ता | विजयसूर्योदयसूरिः | ९० |
| श्रुतिव्यसनम् | विजयसूर्योदयसूरिः | ९१ |
| द्वयोः द्वन्द्वे सफलः तृतीयः | विजयसूर्योदयसूरिः | ९२ |
| कृतज्ञता | मुनिरत्नकीर्तिविजयः | ९३ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | | कर्ता | पृष्ठम् |
|---|---|---|---|
| कथा | आचरणेन सिद्धिः | मुनिधर्मकीर्तिविजयः | ९७ |
| | देवधनभक्षणदोषः | मुनिधर्मकीर्तिविजयः | ९८ |
| व्यङ्ग्यकथा | तदपि न मुञ्चत्याशापिण्डम् | मुनिरत्नकीर्तिविजयः | ९९ |
| रङ्गमञ्चः | धनेन दानवः दयया मानवः | स्वामी श्रीब्रह्मानन्देन्द्रसरस्वती | १०१ |
| | मर्म-नर्म | कीर्तित्रयी | १११ |
| प्राकृतम् | धम्मो न विक्केयव्वो | मुनिकल्याणकीर्तिविजयः | ११५ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अध्यात्मसारानुगमः
## ( अवशिष्टः अंशः )

चतुर्थः प्रबन्धः

द्वादशोऽधिकारः

**सम्यक्त्वम्**

[वंशस्थम्]

**कर्ता : आ. धर्मधुरन्धरसूरिः**
**प्रेषक : आ. प्रद्युम्नसूरिः**

सुदर्शनं चक्रमहो महोदयं,
ददाति दुष्टान् विनिहत्य सन्ततम् ।
तथैव सद्दर्शनमात्मसम्पदं,
तनोति दुर्दान्तभवभ्रमं हरत् ॥१॥

क्रियाः प्रदानादिमुखाः फलं शिवं,
विना न सद्दर्शनमत्र तन्वते ।
शुची रुचिर्धर्मधनार्थमुच्छ्रिता,
भवत्यसौ दर्शनमादि लक्षणम् ॥२॥

अहिंसत्रद्धिर्वरदर्शनं श्रिता,
स्वरुपमात्मादिगतं तदर्पितम् ।
अनित्यनित्यस्थितिकेऽत्र चेतने,
भवेन्न चैकान्तमते विवेचनम् ॥३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुदेवमर्हन्तमुपासितुं मनो,
गुरुञ्च चारित्रपवित्रजीवनम् ।
दयामयं धर्ममनन्तशर्मदं,
तदेव सम्यक्त्वमिहाऽऽत्मसङ्गतम् ॥४॥

गुणस्थितिं प्राप्नुवतो विशुद्धितो,
भवेद् विशुद्धं किल दर्शनं क्रमात् ।
प्रमत्ततायाः परतः परं परं,
त्रयोदशे स्थानवरे गुणस्थितेः ॥५॥

क्षयादहो दर्शनसप्तकस्य यद्,
भवेददः क्षायिकमिद्धशुद्धिभृत् ।
शिवप्रदानाय समर्थमेतकं,
भवप्रपञ्चं त्वरितं निकृन्तति ॥६॥

शमाद्यसंवेगचरद्वितीयक-
स्तृतीयनिर्वेदविलाससत्तमः ।
दया तुरीयोऽस्ति विवेकपञ्चमो-
ऽसुमान् हि सद्दर्शनलक्षणाञ्चितः ॥७॥

सकृत् सुलब्धं यदि दर्शनं भवे,
भ्रमन्नपि स्यान्न हि पूर्वबन्धकः ।
तदेतदाप्तुं सततं शिवार्थिना,
बलेन मिथ्यात्वतमोऽपसार्यताम् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रयोदशोऽधिकारः

## मिथ्यात्वत्यागः

[मन्दाक्रान्ता]

मिथ्यात्वं ही भवभवनभृद्वज्रमूलं समूलं,
श्रेयस्कामो धृतहितपथः काममुन्मूलयेत्तत् ।
यावन्मिथ्यापरिणतिपरस्तावदुन्मत्तभूतः,
संसारान्नो नरकसदृशान्मुक्तिमेतुं विमर्शः ॥१॥

मिथ्यामोहाद्भवति विमतिश्चेतनस्याऽस्तिताया-
मध्यक्षं नाऽवगमयति तां नाऽनुमानं विलिङ्गात् ।
नोऽसादृश्याल्लसदुपमितिर्नैव शास्त्रप्रभेदाद्
नास्त्येवाऽऽत्मा मतमितिमतं नास्तिकानामकान्तम् ॥२॥

आत्मास्तित्वं भवतु परतो नाऽस्ति नित्योऽयमात्मा,
नित्यश्चेन्नो कथमपि भवेदस्य नानास्वरुपम् ।
देवो भूत्वा भवति मनुजो नारकश्चाऽपि तिर्यङ्
सूक्ष्मेक्षित्वे प्रतिपलमसौ भिद्यतेऽदोऽपि मिथ्या ॥३॥

आस्तां नित्यः परमिह न वै कर्तृता कार्यसाध्या,
कर्तृत्वं हि प्रकृतिनियतं चेतने तत् कथं स्यात् ।
साङ्ख्यानां तत् सदसि विदुषां मुक्तसङ्ख्यं विमुग्धं,
सम्यग् युक्त्या मननविषयं नीयमानं विभाति ॥४॥

कामं कर्ता पुरुष इह ही स्यात् परं नाऽस्ति भोक्ता,
भोगस्तस्य प्रभवति न यन्मूर्तताऽस्मिन्न चाऽस्ति ।
नाऽमूर्तानां क्वचिदपि भवेद्भुक्तिरित्यादि मिथ्या,
यत् स्याद्वादाश्रयणकरणाद् दोषलेशोऽपि न स्यात् ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोक्षो बन्धप्रतिहतिभवो बन्धनं चेतने नो,
तत्तन्मोक्षो ननु न घटते कल्पनाशिल्पिशिल्पम् ।
सत्संसारैकरसमतिभिर्मोहमूढैर्यदुक्तं,
तन्नादेयं परमपदता शास्त्रसिद्धाऽनुतर्का ॥६॥

मोक्षोपायः क्वचिदपि न चाऽऽलोकितो लोकमध्ये,
यद्यन्मोक्षाङ्गमिहसकलं दृष्टमेतद्भवाय ।
एतन्मिथ्या जगति गणनातीतजीवा विमुक्ता,
मोक्षोपायो यदि नहि भवेत्तत् कथं स्यात् प्रसिद्धम् ॥७॥

एवं सम्यग् जिनवरवचः स्थैर्यमाधाय धार्यं,
हित्वा मिथ्यामतमसुमतं संसृतेर्मूलभूतम् ।
मिथ्यात्यागो भवति नतरां यावदास्ते ग्रहोऽसन्,
तस्माद् दूरं जहत बिबुधा दुर्ग्रहं चेन्मुमुक्षा ॥८॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्दशोऽधिकार:

## असद्ग्रहत्यागः

[मालिनी]

क्वचिदपि शुभगेहे संस्थितोऽप्युच्चभावं,
न खलु समुपयायान्नीचतां नैव मुञ्चेत् ।
सरलपथमुपेतो वक्रमेव प्रयाति,
श्रियमभिलषमाणैर्दुग्रहो नैव सेव्यः ॥१॥

विनयनयविवेकज्ञानविज्ञानधर्म-
व्रतनियमविचाराचारसंस्कारसारम् ।
तृणनिकरमिवाऽग्निर्यो दहत्यस्तमूलं,
तमसदभिनिवेशं क्लेशमूलं निहन्यात् ॥२॥

सदभिरुचिनिवासो यत्र कुत्राऽपि न स्यात्,
प्रसरति विपदुद्यन्निम्नगानां प्रवाहः ।
क्रुधसमदवदावो द्वेषधूमानुविद्धः,
कुगतिकुमतिमूलं मुञ्च तं दुग्रहाद्रिम् ॥३॥

सलिलमपरिपक्के स्थापितं चेद्घटे तं,
विघटयति निजं वा ध्वंसयत्येवमेवम् ।
श्रुतसलिलमपीष्टं दुर्ग्रहग्रस्तजीवे,
निहितमनुपदं तं नाशयित्वा विनश्येत् ॥४॥

चिरतरमनुचीर्णं चारुचारित्रवृत्तं,
तपउपनतभावं पिण्डशुद्धं प्रतप्तम् ।
फलदलमपि नाऽऽप्तं निह्नवैर्यन्निकामं,
तदसदभिनिवेशस्यैव दोषो दुरन्तः ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नगवति सितपक्षस्तत्त्वसूर्योऽस्तमेति,
भ्रमतिमिरविलासः सर्वतः सर्सरीति ।
समुदयमुपयाति ग्लौर्विवेको न तत्र,
प्रविलसति कुहूर्ही दुर्ग्रहो यत्र नित्यम् ॥६॥

मतिरनुसरतीष्टं नैव तर्कं कदाचित्,
स्वमतिहृदनुरूपं तर्कमेवानुयुङ्क्ते ।
बुधजनहितवार्तां नैव कर्णे विधत्ते,
कदसदभिनिवेशावेशविष्टो विमूढः ॥७॥

हृदयमिह विशुद्धं दर्शनं मुक्तयेऽलं,
करणममलमिद्धं सिद्धसाध्याभिरामम् ।
अनसदभिनिवेशानां जनानां पुनाना,
रुचिररुचिरुदेति प्राप्तयोगस्वरूपा ॥८॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चमः प्रबन्धः

पञ्चदशोऽधिकारः

## योगस्वरूपम्

[प्रहर्षिणी]

अविदितवरयोगसत्स्वरूपो,
भ्रमति भवे कुशलां क्रियां दधानः ।
न हि भवति गतामयः कुपथ्यं,
त्यजति न यावदुपायसावधानः ॥१॥

विविधविधिविधानवर्यभावां,
चरति शरीरविलेखिनीं क्रियां सत् ।
स हि सुखमधिगच्छतीद्धरूपं,
सुरगतिसम्भवमाशु बाह्ययोगात् ॥२॥

यदपि वसति संसृतौ क्रियाया,
विरमति नैव तथाऽपि कर्मबन्धात् ।
तदपकृतिकृते नितान्तमात्मा,
शुभविधिमाचरति प्रशान्तचित्तः ॥३॥

क्रमश उदयमाप्नुवन् सुयोगात्,
प्रविशति सत्तमयोगवर्त्मनीष्टम् ।
भ्रमणमिह ततस्ततं विनश्येत्,
शिवपदमुत्तममाश्रयेत् सुखेन ॥४॥

कलुषितहृदयो भवेत् कषायाद्-
हृदयविशुद्धिरनाविला न मोहात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुपमविशदोऽत्र चिद्विलासो,
विलसति सैव विशिष्टयोगराजः ॥५॥

निजकविभवदर्शनान्न बाह्या-
मभिलषतीश्वरतां कदाचनाऽपि ।
करणनिकरमात्मनीनभावं,
नयति शुभाशुभगोचराश्रितोऽपि ॥६॥

चरतु यदि पुनर्न चाऽऽचरत्वा-
चरणमुदारमभीष्टमागमोक्तम् ।
परमुपरमति क्रिया भवार्था,
शिवपथिकस्य योगिनोऽच्छयोगात् ॥७॥

निजनिजवचनप्रकारभङ्ग्या,
सकलमतैरिदमेव बोधितं तत् ।
तदनु भवितुमार्तरौद्ररोधं,
विशतु मनः सितधर्मयोर्विमर्शे ॥८॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

षोडशोऽधिकारः

# ध्यानस्वरूपम्

[रथोद्धता]

ध्यानमहोभवमुक्तनिदानं, पूर्वयुगं न हितं हितमन्त्यम् ।
आर्तमिहाद्यमुपादिमरौद्रं, धर्म्यमुपान्तिममन्तिमशुक्लम् ॥१॥

इष्टवियुक्तिरनिष्टकृदाप्ति - र्दुःखदवानुभवो ननु मा भूत् ।
तद्विपरीतमथाऽस्तु निदानं, ध्यायति नित्यमिहाऽऽर्तवशात्मा ॥२॥

जीवविघातमसत्यमदत्तं, रक्षणमिन्द्रियगोचरसत्कम् ।
रौद्रवशो विदधात्यविरामं, मुञ्चति तं कुगतिर्न निकामम् ॥३॥

ध्यायति सन्मतिरर्हदुपज्ञं, कर्मविपाकमपायमनन्तम् ।
लोकविचारमनाप्तविकारं, धर्म्यमहर्पतिभासितसारम् ॥४॥

आत्मनि लीनतया गतकामो, मेरुमहीधरवत्स्थिरभावः ।
शुक्लपरः परमात्मपदत्वं, विन्दिति नो चिरमुच्छ्रितसत्त्वम् ॥५॥

कायबलं बलमात्मसमुत्थं, स्थानबलं बलमीप्सितमन्यत् ।
ध्यानकृते सुकृती हृदि धृत्वा, ध्यानपथे पथिकत्वमुपेयात् ॥६॥

यस्य मनः स्पृहतेऽत्र शिवाय, द्रुह्यति दुष्टदुरन्तभवाय ।
ध्यायति नार्तमसौ न च रौद्रं, ध्यायति धर्म्यमथाऽपि च शुक्लम् ॥७॥

सर्वसमीहितदानसमर्थं, पूरितपूर्णपवित्रपुमर्थम् ।
ध्यानवरं यदि वाञ्छसि सत्यं, ध्याननृपस्तुतिमाचर तथ्यम् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तदशोऽधिकारः

## ध्यानस्तुतिः

[शालिनी]

यं सेवन्ते पूरुषाः सिद्धबुद्धा, यस्योपास्त्या सिद्धयः सम्भवन्ति ।
यन्माहात्म्यं गातुमीशोऽप्यनीश-स्तं वन्दे सद्ध्यानराजाधिराजम् ॥१॥

यत्सान्निध्यं सन्निधिर्नो जहाति, ब्रह्माण्डं यत्पादपद्मेऽलिभूतम् ।
रम्योल्लासो यत्कटाक्षेक्षणोत्थ-स्तं वन्दे सद्ध्यानराजाधिराजम् ॥२॥

चक्रं यस्य ब्रह्मरन्ध्राख्यमिद्धं, दोषान् सर्वान् मुक्तनिद्रं व्यपास्ते ।
क्षेत्रं षट्खण्डात्मकं शास्त्यखण्डं, तं वन्दे सद्ध्यानराजाधिराजम् ॥३॥

नाडीनामुल्लासनं यस्तनोति, त्रैलोक्यं यः पश्यतीष्टस्वरूपम् ।
यद्दीक्षातो दुःखदौर्गत्यनाश- स्तं वन्दे सद्ध्यानराजाधिराजम् ॥४॥

येऽभूवन् ये भाविनो ये भवन्ति, प्राप्तानन्तश्रेयसानन्दकन्दाः ।
ते सर्वेऽपि प्रीतितो यस्य शश्वत्, तं वन्दे सद्ध्यानराजाधिराजम् ॥५॥

यः पूर्णो यं स्मः श्रिता येन तुल्यं, नाऽन्यद्यस्मै स्तान्नमः शर्म यस्मात् ।
तेजो यस्योच्चैःपदं भाति यस्मिन् , तं वन्दे सद्ध्यानराजाधिराजम् ॥६॥

यत्स्वाधीनं विश्वविश्वस्वरूपम्, सम्पूर्णाशानन्दितात्मीयभूपम् ।
सम्प्राप्तानन्तात्मशर्माभिरामं, तं वन्दे सद्ध्यानराजाधिराजम् ॥७॥

गङ्गासिन्धू नाडिके चन्द्रसूर्ये, क्षेत्रं सम्यक् षड्विभागं विधत्तः ।
तज्जित्वा यो भ्राजते लब्धरूप- स्तं वन्दे सद्ध्यानराजाधिराजम् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठः प्रबन्धः

अष्टादशोऽधिकारः

## आत्मनिश्चयः

[प्राभातिकरागेण गीयते]

आत्मनश्चिन्तनं येन शश्वद्धितं, निश्चयेनाऽहितं चेद्विकल्पोज्झितम् ।
तस्य दुर्वारसंसारसम्पादकं, कर्मणो बन्धनं छुट्यते तत्क्षणम् ॥१॥

चेतनाशक्तिभृच्चेतनाः सर्वशो-ऽनन्तसङ्ख्या न भिन्नस्वरूपाः समे ।
सङ्ख्ययाऽतीतलोकप्रदेशात्मका, ज्ञानसद्दृष्टिचारित्रवीर्यालयाः ॥२॥

कोऽपि नेष्टे विधातुं जडं चेतनं, चेतनं वा जडं कालमात्रेऽपि च ।
शुद्धरूपं दधज्जीवतत्त्वं सदा, विश्वविश्वैकचेतोरमं राजते ॥३॥

हन्ति नाऽयं न वै घात्यते केनचिद्, घातयत्यात्मना नाऽन्यमन्येन यत् ।
नित्यतां जातुचिन्नो जहाति क्वचित्, स्वात्मशुद्धस्वरूपे लसँस्तिष्ठति ॥४॥

चेद्भवेन्नैवमात्मस्वरूपं तदा, सिद्धरूपं कथं सङ्गतं स्यात्सदा ।
सिद्धतामाप्तुमेवाऽऽत्मनां धर्मतः, प्रीतिरीतिप्रतीत्यादिकं युज्यते ॥५॥

निश्चयादात्मरूपेण सत्रा समा-गन्तुमीहा तदा भावशुद्धं चरेत् ।
व्यावहारं क्रियाकाण्डमुधद्बलं, यत्तदेवाऽलमेतेन संयोजितुम् ॥६॥

येन पथ्यं क्रियाया विधानं हितं, चेन्न चीर्णं भवेत्तस्य किं वाऽऽत्मना ।
यो न कासारपारं प्रयातुं ह्यलं, सोऽम्बुधेः पारमेतुं कथं शक्ष्यति ।

आत्मनो ज्ञानमार्गस्वरूपं यदि, ज्ञातुमुत्कण्ठते स्वान्तमेकान्ततः ।
तत् परं श्रेयसामास्पदं सत्पदं, जैनसिद्धान्तमुच्चैस्तरां स्तूयताम् ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमः प्रबन्धः

एकोनविंशतितमोऽधिकारः

## जिनमतस्तुतिः

[शार्दूलविक्रीडितम्]

मूलं यस्य रजोऽवगुण्ठितमहो चार्वाककिंदर्शनं,
स्कन्धो ब्रह्मविवेचकः समुदितो मीमांसया शाखया ।
बौद्धन्यायमतौ प्रवालकदलौ, साङ्ख्यः प्रसूनं फलं,
श्रेयोऽसौ जयतात् सदाऽर्हतमतः कल्पद्रुमः सन् स्थिरः ॥१॥

चार्वाको हि शृगालबालसदृशो वेदान्तिदन्तावलो,
बौद्धस्त्वाखनिकः शशः कपिलभूर्मीमांसकः सैरिभः ।
शृङ्गी काणभुजो भुजङ्गमसमं सर्वे श्रयन्ति श्रुतं,
संसारे गहने वनेऽत्र रमते पञ्चाननोऽर्हन्मतः ॥२॥

तत्त्वज्ञानविचारचारुगगने चार्वाकराहुर्बुधो,
वेदान्ती बृहतीपतिः कणभुजां शिष्यः कविः कापिलः ।
बौद्धो भूमिभवः शनैश्चरचरो मीमांसकः कर्मठः,
सूर्याचन्द्रमसौ परं प्रभवतः स्याद्वादजैनागमौ ॥३॥

आत्मानः कति सन्ति ! चाऽत्र विषये, भ्रान्ता मता मूढतां,
बिभ्राणाः शिवसाधनं द्रढयितुं नाऽलम्भवन्ति क्वचित् ।
आत्मानन्त्यमुदीर्य दोषविकलं येनोद्धृतोऽध्वा शिवः,
सार्वीयं परमार्हतं विजयतां तच्छासनं सर्वदा ॥४॥

आत्मा निश्चयतो ध्रुवोऽनुसमयं पर्यायतो भङ्गुरो,
नित्यानित्य इति व्यवस्थितिमितोऽनेकान्तवादान्मतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवं भवमोक्षमङ्गलगतिर्यस्मिन् समुद्घोषिता,
तं वन्दे जिनशासनं बुधजनात्मोल्लासनं भासनम् ॥५॥

रागद्वेषमहाज्ञतापरवशाः संसारसंवर्धनाः,
सर्वे सन्ति मता मदान्धमतयः स्वार्थैकसंसाधनाः ।
तद्दोषत्रयमुक्तमात्मसुहितं सद्भिः समासेवितं,
श्रेयः शासनमार्हतं विजयते मोहारिविद्रोहणम् ॥६॥

तत्त्वातत्त्वविवेकशून्यमनसः संभूय संसारतः,
स्वं चाऽन्यं परिमोचनाय मुखराः कुर्वन्ति कोलाहलम् ।
यावज्जैनमतं श्रयन्ति न हितं तावन्न मोक्षार्थिनो,
यच्छ्रीमज्जिनराजशासनमहो मोक्षैकदानक्षमम् ॥७॥

यत् पूर्णं यदुपासते सुकृतिनो येनैव निःश्रेयसं,
यस्मै संस्पृहयन्ति मुक्तिरसिका आत्मानुभूतिर्यतः ।
यस्योद्घोषमदोषमात्मनिभृता आकर्ण्य सत्यं श्रिता,
यस्मिंश्छासति सुस्थमत्र तदिदं जैनं परं शासनम् ॥८॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

विंशतितमोऽधिकारः

# अनुभवस्वरूपम्

[सारंगरागेण गीयते ।]

आत्मन् ! अनुभवनिजमतुरूपम्,
भावय भवमस्वरूपम् - आत्मन् !
ज्ञानमनन्तं दर्शनमेवं, सुखमपि परमं पीनम् ।
श्रद्धानं क्षयरहितं चरणं, भवतः सकलमनीनम् आत्मन्० ॥१॥

अक्षयस्थिति जीवनमभिरूपं, रूपं त्वगुरुलघुत्वम् ।
वीर्यवितरणादिकबलमसमं, पश्यसि किं न लघुत्वम् आत्मन्० ॥२॥

आदिविरहितोऽनेहा इह ते, जातोऽजातसमानः ।
केवलपुद्गलपरिचयकरणे, व्यपनीतो गतभानः आत्मन्० ॥३॥

भवपरिपाकवशेन निगोदाद्, बहिरागमनं जातम् ।
क्रमशो विलसितमपि चेतनया, तदपि न पुरः प्रभातम् आत्मन्० ॥४॥

चरमावर्तप्रवेशानन्तर-मभिरुचितोऽध्वा श्रेयः ।
करणत्रयकरणाद्विज्ञातं, किं श्रेयः किं प्रेयः ? आत्मन्० ॥५॥

यथा यथाऽपसृतः सम्मोह-श्वरणपरो भवमूलम् ।
तथा तथा विकसितो निजात्मा, शिवमार्गानुकूलम् आत्मन्० ॥६॥

समुचितसितसंकल्पबलेन, साध्यः क्षपकारोहः ।
सकलकर्ममलरहितो भवताद्, न भवेद्यद्भवरोहः आत्मन्० ॥७॥

समसमीहितदानसमर्थं, कुरु गुरुस्तवनमुदारम् ।
धर्मधुरन्धर यशसोज्ज्वलितं, प्राप्तुं हि परपारम् आत्मन्० ॥८॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकविंशतितमोऽधिकारः

## सज्जनस्तुतिः

[स्रग्धरा]

आस्तां स्निग्धः प्रसन्नः श्रुतरसरमणो दोषहृद् गौरवाङ्गो,
विश्वालङ्कारवर्यः सुघटितघटनोऽनेकवर्णः सुवर्णः ।
यावद्दुर्वृत्तजिह्वाज्वलदनलकृतां शुद्धिमासादयेन्नो,
तावन्नाऽऽप्नोति निष्ठां कनकवदवनौ सत्कवीनां प्रबन्धः ॥१॥

राजा गौरी गुरुर्वा रजतजकलशो डिण्डिरस्त्र्यक्षहासः,
सद्वर्णे सज्जनानां निजनिजसमतामीहमानाः स्वनन्ति ।
नैतद्युक्तं यतस्तान् विशदयति सतां वर्णपूरोऽविरामं,
नो चेत्ते कृष्णपक्षाप्रथमरजनिवत् कृष्णकान्तिं ह्यवाप्स्यन् ॥२॥

सत्कीर्त्या सज्जनानां धवलितमभितो विश्वमेतत् समस्तं,
दुर्वृत्तानामथाऽप्याननमतिमलिनं किन्नु जातं न शुभ्रम् ।
नैतच्चित्रं यतोऽस्मिन् जगति सुविदितं श्वेतवर्णे समीपे,
कृष्णो वर्णोऽतिकृष्णः प्रभवति नितरां म्लाति यद्वद् मृगोऽङ्के ॥३॥

नो घ्नन्ति प्राणिनो नोऽभिदधति वितथं नैव गृह्णन्त्यदत्तं,
सेवन्ते मैथुनं नो विविधनवविधामर्थमूर्च्छां त्यजन्ति ।
स्वात्मारामे रमन्ते नयविनयनताः सज्जना येऽप्रसक्ता-
स्तान् वै वन्दामहे तच्चरणसरसिजे चञ्चरीका भवामः ॥४॥

सद्वृत्तानां विशुद्धे यशसि सितकरज्योतिरच्छे सरस्के,
स्नायं स्नायं नितान्तं जगदखिलमभूदुज्ज्वलं स्वच्छशुभ्रम् ।
एतत् स्पष्टं परं किं कलुषकलुषिते दुर्ज्जनानामवर्णे,
सकृत्पातेन(ऽसत्कृत्पातेन?) जातं द्विकपिकवृकभेकादिकं कृष्णकान्तम् ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रे ग्रन्थे प्रबन्धे महति कविविधौ खण्डकाव्ये कथायां,
चम्प्वां नाट्ये चरित्रे प्रहसनललिते यत्र तत्राऽपि लेख्ये ।
सद्वृत्तैः सज्जनानां स्तुतिरनुपमितिर्यद्व्यधायि प्रसन्ना,
वीक्ष्यैतद्दुर्जनानां मनसि मलिनता व्याप्नुयात्तन्न चित्रम् ॥६॥

सच्चन्द्रं ग्रस्तुकामो मधुकरचरणैः स्पर्धमानः सपातो
दुर्वृत्तः सन्ततं तं बुधविरहितमन्वेषयन् बम्भ्रमीति ।
नाऽद्याऽप्येतेन तस्य ग्रहणमनुकृतं प्राप्तपाताः सदुष्टो,
ज्योत्स्ना सच्चन्द्रजन्मा सकलमपि जगज्जीवयन्ती चकास्ति ॥७॥

आसीन्नेमीतिनामा ह्यमृतजलनिधिः प्राज्यपुण्यप्रभाव-
स्तत्कीर्तिः कल्पवल्लीव वितरति मनोवाञ्छितं भक्तिभाजाम् ।
तस्याः पत्रं प्रसूनं फलमतिरसमासादितं स्वादितं यै-
स्ते धन्या धर्मधुर्या जगति विजयिनो विश्ववन्द्या अभूवन् ॥८॥

अध्यात्मसारानुगमं विधाय,
मयाऽर्जितं यत् सुकृतं विशेषात् ।
भूयाज्जनस्तेन यशोनिधानः
पुण्यामृतो धर्मधुरन्धरश्च ॥१॥

(सम्पूर्णः)

C/o. श्रीजितेन्द्र कापडिया
१०, लाभ कोम्प्लेक्ष
१२-बी, सत्तर तालुका सोसा.
पो. नवजीवन, अहमदाबाद-३८००१४.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अष्टादशपापस्थानकालोचनाशतकम् ॥

आ. विजयहेमचन्द्रसूरिः

वीरं भक्त्या जगद्वन्द्यं, नत्वा स्मृत्वा च सद्गुरुम् ।
पापभारापनोदाय, प्रयतेऽहं यथामति ॥१॥ (अनुष्टुप्-वृत्तम्)

अनाद्यनेहसो योऽसौ, संयोगो जीवकर्मणोः ।
दुःखरुपस्तथा दुःख-फलो दुःखानुबन्धकः ॥२॥

शुद्धधर्मं विना न स्या-त्तद्विच्छेदः कथञ्चन ।
तदवाप्तिर्भवेज्जन्तो-र्विगमात् पापकर्मणः ॥३॥

स्यात्पापकर्मविगम-स्तथाभव्यत्वपाकतः ।
तत्पाकसाधनान्येवं, जगुस्त्रीणि जिनेश्वराः ॥४॥

चतुःशरणसम्प्राप्ति-स्तथा दुष्कृतगर्हणा ।
अर्हत्सिद्धादितत्त्वानां सदा सुकृतसेवना ॥५॥

द्वितीयं साधनं तत्र, प्रोक्तं दुष्कृतगर्हणम् ।
विशेषेणेह संक्लिष्ट-पापनाशाय गद्यते ॥६॥

इहाऽनारतसंसार-परिभ्रमणहेतवः ।
अष्टादशाऽपि हिंसादि-पापस्थानानि जन्मिनाम् ॥७॥

**प्रथमपापस्थानकालोचना**

तत्र प्राणातिपाताऽऽख्यं, पापस्थानकमग्रिमम् ।
सर्वदोषकरं सर्व-गुणहानिकरं मतम् ॥८॥

त्रसस्थावरजीवानां, प्राणानां यद्वियोजनम् ।
प्रमत्तयोगतः स्यात्तद्-हिंसा शास्त्रे निरुप्यते ॥९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरम्यैतादृशप्राणा-तिपाताद् व्रतमाचरन् ।
दयापरो भवेदात्मा, ह्येतद् धर्मप्रयोजनम् ॥१०॥

एक-द्वि-त्रि-चतुः-पञ्चे-न्द्रियादिप्राणिनो मया ।
भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ॥११॥

ये ये विराधिताः सर्वा-स्तानहं क्षमयाम्यथ ।
तद्धिंसाजनितं भूया-न्मिथ्या मे दुष्कृतं प्रभो ! ॥१२॥

## द्वितीयपापस्थानकालोचना

असत्याख्यं द्वितीयं च, पापस्थानकमुच्यते ।
हास्य-लोभ-भय-क्रोधै-र्मृषोक्तिं चक्षते जनाः ॥१३॥

जायतेऽसत्यतो वैरं, सन्तापश्च प्रवर्धते ।
बहून्यन्यानि पापानि, प्रभवन्ति मृषोक्तितः ॥१४॥

सकृदुक्तमसत्यं हा !, सत्यापयितुमीहया ।
शतशो मानवोऽसत्यं, वक्तीति श्रूयते श्रुते ॥१५॥

असत्यं वचसां रोगः, परमं पदमापदाम् ।
नाऽसत्यवचनं तस्मात्, प्राणान्तेऽपि वदेत्सुधीः ॥१६॥

भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ।
यदसत्यं मया प्रोक्तं, तन्मिथ्या मम जायताम् ॥१७॥

## तृतीयपापस्थानकालोचना

परेण नैव यद्दत्तं, गृह्यते द्रविणादिकम् ।
तृतीयं तद् भवेत्पाप-स्थानकं स्तेयनामकम् ॥१८॥

ग्रामे वा विजने वाऽपि, पतितं विस्मृतं तथा ।
तृणमात्रमपि प्राज्ञो, न गृह्णीयात्कदाचन ॥१९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वधजन्यं भवेद् दुःखं क्षणमेकस्य देहिनः ।
प्रियापुत्रयुतस्य स्याद्, यावज्जीवं धने हृते ॥२०॥

अत्र वधादिकं प्रेत्य, प्राप्यते येन दुर्गतिः ।
तत्स्तेयं वर्जयित्वा ज्ञो, नाऽऽप्नुयात्कः शमुत्तमम् ? ॥२१॥

भवेऽस्मिन् वा पुराऽज्ञानाद्, भवेष्वन्येषु केषुचित् ।
गृहीतं यन्मयाऽदत्तं, तन्मिथ्या मम जायताम् ॥२२॥

## चतुर्थपापस्थानकालोचना

मैथुनाख्यं तथा तुर्यं, पापस्थानकमाविलम् ।
यदाचर्य जनो विश्वे, प्रशंसां लभते नहि ॥२३॥

बुद्धिर्हि क्रमशो येन, सच्छिद्रघटवारिवत् ।
हीयते तत्कथं धीरः, प्रतिषेवेत मैथुनम् ॥२४॥

एकेयं विषयासक्ति-र्गुणेष्वन्येषु सत्स्वपि ।
काणकपर्दिकातुल्यं, विधत्ते मनुजं खलु ॥२५॥

शूरोऽपि ज्ञातशास्त्रोऽपि, जनो यस्य वशंगतः ।
वीर्यज्ञानविहीनः स्यात्, तदब्रह्म न भद्रकृत् ॥२६॥

विषयाख्यविषध्वस्तो, मनोवाक्कर्मभिर्भृशम् ।
यदकार्षमहं पापं, तन्मिथ्या मम जायताम् ॥२७॥

## पञ्चमपापस्थानकालोचना

धन-धान्य-सुवर्णादौ, ममताबुद्धिलक्षणम् ।
परिग्रहाभिधं पाप-स्थानकं पञ्चमं मतम् ॥२८॥

परिग्रहग्रहाविष्टः, सत्स्वप्यर्थेषु भूरिषु ।
मनागप्येति नो शान्तिं, भ्राम्यतीतस्ततो भुवि ॥२९॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुनोत्यसंशयं विश्व-मपूर्वोऽयं ग्रहोऽशुभः ।
सन्तोषमन्त्रजापेन, तच्छान्तिर्जायते ध्रुवम् ॥३०॥

इन्धनैर्नाऽनलो नैव, नदीभिः पूर्यतेऽम्बुधिः ।
परिग्रहैस्तथा जीवो, न तृप्यति कदाचन ॥३१॥

गृहीत्वाऽनुज्झिता ये ये, विधिपूर्वं परिग्रहाः ।
तज्जन्यं दुष्कृतं सर्वं, मिथ्या मे जायतां प्रभो ! ॥३२॥

**षष्ठपापस्थानकालोचना**

षष्ठं क्रोधाभिधं पाप-स्थानकं शमसौख्यहृत् ।
विपाकविरसं सिद्ध-प्रायःकार्यस्य नाशकम् ॥३३॥

क्रोध उत्पद्यमानः स्वं, पूर्वं दहति वह्निवत् ।
अभावे शमनीरस्य, परान् प्रज्वालयेदपि ॥३४॥

उत्कृष्टतपसा जीवो, यत् पूर्वकोटिवत्सरैः ।
उपार्जयति पुण्यं तत्, क्रोधान्नाशयति क्षणात् ॥३५॥

चारित्रभाजनं विज्ञं, त्यजन्ति क्रोधिनं जनाः ।
मणिना भूषितं सर्पं, केऽपि रक्षन्ति नाऽऽलये ॥३६॥

यत्किञ्चिद् दुष्कृतं पूर्वं, क्रोधेनोपार्जितं मया ।
मनसा कर्मणा वाचा, तत् त्रिधा क्षमयाम्यहम् ॥३७॥

**सप्तमपापस्थानकालोचना**

मानाख्यं सप्तमं पाप-स्थानकं विनयापहम् ।
शैलस्तम्भोपमं येन, स्तब्धो भवति मानवः ॥३८॥

स्तब्धत्वान्न विधत्ते स, गुरुशुश्रूषणं परम् ।
शुश्रूषाभावतो जातु, श्रुतलाभः कथं भवेत् ! ॥३९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुताभावान्न विरति-रविरत्या न संवरः ।
असंवरात्तपो नैव, निर्जरा न तपो विना ॥४०॥

विना निर्जरया नैव, ह्यक्रियत्वं प्रजायते ।
अभावे चाऽक्रियत्वस्य, नाऽयोगित्वभवक्षयौ ॥४१॥

मानेनैतादृशा पूर्वं, भवभ्रमणहेतुना ।
यद् दुष्कृतं मया बद्धं, तत् त्रिधा क्षमयाम्यहम् ॥४२॥

## अष्टमपापस्थानकालोचना

सर्वानर्थप्रसूर्माया, पापस्थानकमष्टमम् ।
बहिर्या रम्यरूपाऽपि, करालाऽभ्यन्तरे भृशम् ॥४३॥

अपराधमकुर्वाणो, गुणयुक्तोऽपि मायिकः ।
सर्पवन्नहि विश्वास-भाजनं जातु जायते ॥४४॥

रिपुभावं वहन् क्रोधी, प्रशस्तः प्रकटं न तु ।
मायी मित्रस्वरूपेण, शत्रुकार्यं करोति यः ॥४५॥

श्रीमल्लेः प्राग्भवे बद्ध-तीर्थकृन्नामकर्मणः ।
अपि स्त्रीत्वमभूत् तत्र, को हेतुर्मायया विना ॥४६॥

भवेऽस्मिन् यत् पुरा माया-वशादन्यभवेषु वा ।
उपार्जितं मया पापं, तन्मिथ्या मम जायताम् ॥४७॥

## नवमपापस्थानकालोचना

पापस्थानकमादिष्टं, नवमं लोभनामकम् ।
सर्वदा सर्वजन्तूनां, यत्परं प्रीतिकारणम् ॥४८॥

यन्मुखे पतितः प्राणी, चक्री वा वासवोऽपि वा ।
प्राप्तलोकत्रयैश्वर्यः, सुखी न क्षणमप्यहो ? ॥४९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं शरावववन्मूले, लघुः पश्चान्महत्तरः ।
न सन्तोषं विना केऽपि, तं जना जेतुमीशते ॥५०॥

स्वयम्भूरमणाम्भोधिं, देवास्तरितुमीश्वराः ।
तेऽपि लोभाम्बुधिं नैव, कथञ्चित्तरितुं क्षमाः ॥५१॥

अर्जितं यन्मया पूर्वं, लोभेन दुष्कृतं हि तत् ।
मिथ्या कुर्वे त्रिधा पीत-सन्तोषपरमामृतः ॥५२॥

**दशमपापस्थानकालोचना**

रागाख्यं दशमं पाप-स्थानकं बलवत्तरम् ।
संसारे यद्वशा जीवाः, पर्यटन्ति भवाद् भवम् ॥५३॥

अयमेव हि सर्वासा-मापदां मूलकारणम् ।
प्राप्नुयाद् दुःखकणिका-मस्याऽभावे कथं नरः ॥५४॥

निर्वर्णां दन्तुरां कुब्जा-मवटीटां च वामनाम् ।
रागवान् मनुते नारीं, रतिरूपातिशायिनीम् ॥५५॥

विरागमार्गगान् पान्थान्, प्रच्छन्नोऽयं मलिम्लुचः ।
भटैर्विषयरागाद्यै-र्निःशङ्कं खलु लुण्टति ॥५६॥

फूत्कृत्याऽऽखुरिवाऽऽत्मानं, विदश्य यस्तुदत्यरम् ।
तद् रागजनितं पापं, मिथ्या कुर्वे पुनः पुनः ॥५७॥

**एकादशपापस्थानकालोचना**

एकादशमतीवोग्रं, पापस्थानकमीरितम् ।
द्वेषाख्यं मुक्तिपूर्द्वार-परिघं प्रीतिनाशकम् ॥५८॥

चित्रशाला यथा रम्या, भवेद् धूमेन धूसरा ।
तथा द्वेषेण निन्द्यं स्या-च्छुचि संयमजीवनम् ॥५९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतं तपश्चिरं चीर्णं, चारित्रं च गुणावहम् ।
तदैव स्याद् यदा चित्तं, न दष्टं द्वेषभोगिना ॥६०॥

सुखसाधनयुक्तोऽपि, यत्सद्भावान्तरो नहि ।
क्षणमप्याप्नुते शान्तिं, तं द्वेषं ज्ञः कथं वहेत् ? ॥६१॥

द्वेषेणोपार्जितं पापं, यन्मया पूर्वजन्मसु ।
तत्सर्वं मनसा वाचा, कर्मणा विदधाम्यसत् ॥६२॥

**द्वादशपापस्थानकालोचना**

द्वादशं कथितं पाप-स्थानकं कलहाभिधम् ।
दुःखानां कटु मूलं यत्, ख्यातं सङ्क्लेशकारणम् ॥६३॥

कलहो नैव कर्तव्यः, कर्तव्यश्च निजात्मना ।
दुरन्तकलहव्याधे-र्मौनमुत्तममौषधम् ॥६४॥

परस्य दुर्वचः श्रुत्वा, प्रत्युत्तरति रोषतः ।
तन्निशम्य वदेत्सोऽपी-त्येवं स्यात्तत्परम्परा ॥६५॥

यत्राऽस्ति कलहस्तत्र, न श्रीर्वसति कर्हिचित् ।
श्रामण्यं चाऽपि विफलं, साधोः कलहकारिणः ॥६६॥

यदर्जितं मया पापं, भवेऽत्राऽन्यभवेषु वा ।
कलहेन त्रिधा सर्वं, तदद्य विदधे मृषा ॥६७॥

**त्रयोदशपापस्थानकालोचना**

त्रयोदशं समाख्यात-मभ्याख्यानाभिधं त्वघम् ।
समुल्लसद्विकारं तद्, दूरीकुर्याद् विदूरतः ॥६८॥

असतः परदोषान् यो, वक्ति मुग्धमतिर्जनः ।
सेह लाघवमासाद्य, प्रेत्य स्याद् दुःखभाजनम् ॥६९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तोऽपि परदोषा न, वक्तव्या इति सत्स्थितिः ।
तेषामप्यसतां वक्तु-र्दुर्वृत्तस्य तु का कथा ॥७०॥

श्रुत्वा जिनवचश्चित्तं, चेद् भवेत् साम्यवासितम् ।
न परस्याऽसतो दोषां-स्तदा जातु वदेत् सुधीः ॥७१॥

अभ्याख्यानेन यद् बद्धं, दुष्कृतं पूर्वजन्मसु ।
कुर्वे मृषा त्रिधा नाथ !, तत्त्वदाराधनापरः ॥७२॥

**चतुर्दशपापस्थानकालोचना**

चतुर्दशं परं पाप-स्थानं पैशुन्यमीरितम् ।
परोक्षे परदोषाणा-मुक्तिः पैशुन्यमुच्यते ॥७३॥

सत्कृतोऽपि खलः कामं, पिशुनत्वं जहाति न ।
ततस्तु श्वा वरो भक्ष्य-मात्रेण वशमेति यः ॥७४॥

पयःप्रक्षालितः काको, यथा याति न शुभ्रताम् ।
नैकशिक्षोक्तिभिस्तद्वद्, दुष्टो न सुजनो भवेत् ॥७५॥

निम्बोऽमृतेन संसिक्तो, माधुर्यं जातु प्राप्नुयात् ।
न खलो वचनैः स्निग्धैः, सौजन्यं मानितो मुहुः ॥७६॥

पैशुन्याचरणैर्बद्धं, यत्पापं पूर्वजन्मसु ।
मनसा कर्मणा वाचा, तत्सर्वं विदधे मृषा ॥७७॥

**पञ्चदशपापस्थानकालोचना**

समाख्यातं पञ्चदशं, रत्यरत्याख्यकं परम् ।
पापस्थानं यतश्चैते, संयुक्ते तिष्ठतः सदा ॥७८॥

किञ्चिद्धेतू रतिर्यत्रा-ऽरतिस्तत्राऽन्यहेतुका ।
स्यादेवेति मतं पाप-स्थानमेकमिदं श्रुते ॥७९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रतिर्वाऽरतिरित्येषा, केवला चित्तकल्पना ।
विपर्ययोऽनयोर्लोके, दृश्येत कथमन्यथा ॥८०॥

रत्यरत्यनलं प्राप्य, यदाऽयं चित्तपारदः ।
नश्येन्नहि तदाऽनन्त-सौख्यस्वर्णाय जायते ॥८१॥

रत्याऽरत्याऽपि यत्पूर्वं, पापं बद्धं मया प्रभो ! ।
मनसा कर्मणा वाचा, तन्मिथ्या विदधे समम् ॥८२॥

## षोडशपापस्थानकालोचना

उक्तं षोडशकं पाप-स्थानकं दुःखकारणम् ।
नेच्छेत् परपरीवादं, कदाचिन्मनसा सुधीः ॥८३॥

परनिन्दारसो नून-मतिशेते रसान् समान् ।
कामं यत्पानतो मर्त्यो, न श्राम्यति न तृप्यति ॥८४॥

तपस्त्यागादिकं याव-ज्जीवं नश्यत्यनुष्ठितम् ।
यत्करणात्कथं प्राज्ञोऽ-न्यनिन्दां तां समाचरेत् ? ॥८५॥

कर्मजन्यं च जीवानां, तारतम्यं विदन् बुधः ।
गुणदृष्ट्या जगत् पश्यन्, कथं निन्दापरो भवेत् ॥८६॥

विधाय परनिन्दां यद्, भवेऽत्राऽन्यभवेषु वा ।
उपार्जितं मया पापं, तत्सर्वं मृषयाम्यहम् ॥८७॥

## सप्तदशपापस्थानकालोचना

प्रोक्तं मायामृषावाद-पापस्थानकमाविलम् ।
सप्तदशकमेतज्ज्ञै-स्त्यक्तव्यं भूतिमिच्छुभिः ॥८८॥

एका मायाऽप्यनर्थाय, भृशं भवति देहिनाम् ।
मृषावादेन युक्ता चे-त्तदाऽनर्थस्य का कथा ॥८९॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

मायायुक्तो मृषावादी, बकवद् भ्रान्तिकारकः ।
मुखे मिष्टः स चित्ते तु, विषदिग्धो भवेद् घनम् ॥९०॥

विषेण संस्कृता यद्वत्, प्राणघ्नी कटुतुम्बिका ।
तद्वन्मायी मृषावादी, विश्वस्तं हन्ति सर्वशः ॥९१॥

पापं मायामृषावादै-र्बद्धं यत्पूर्वजन्मसु ।
मनसा कर्मणा वाचा, त्रिधा तद् विदधे मृषा ॥९२॥

**अष्टादशपापस्थानकालोचना**

मायामिथ्यात्वशल्याख्यं, पापस्थानकमन्तिमम् ।
प्रोक्तं सर्वेभ्य एवेदं, पापस्थानेभ्य उन्नतम् ॥९३॥

मिथ्यात्वं चेद् वृथा सर्वं, चारित्राराधनादिकम् ।
अपि किञ्चित्फलायाऽलं, न स्यात्तप्तं चिरं तपः ॥९४॥

इदं हि परमं शस्त्रं, परः शत्रुं परं तमः ।
दुःखं दैन्यं च दौर्भाग्यं, दारिद्र्यं चाऽप्यदः परम् ॥९५॥

यथा शस्त्री बलिष्ठोऽपि, नाऽन्धः परचमूं जयेत् ।
न मिथ्यादृक तथा त्यागी, कुरुते कर्मनिर्जराम् ॥९६॥

एकविंशतिमिथ्यात्वं, त्यक्त्वा यो गुरुमर्चयेत् ।
सम्यक्त्वशालिनस्तस्य, कृतं तपोव्रतादिकम् ॥९७॥

येनाऽद्यावधि संसारे, जन्मरुङ्मृत्युभीषणे ।
भ्रामं भ्रामं न निर्विण्ण-स्तन्मिथ्यात्वं त्यजाम्यहम् ॥९८॥

मनसा कर्मणा वाचा, मिथ्यात्वप्रेरितेन यत् ।
भवे भवे कृतं पापं, तन्मुधा मम जायताम् ॥९९॥

अष्टादशैवमालोच्य, पापस्थानानि भावतः ।
जीवा निहत्य कर्माणि, प्राप्नुयुः परमं पदम् ॥१००॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ प्रशस्तिः

श्रीतीर्थनाथैरपि पूजिताय, भव्यैर्नितान्तं किल कामिताय ।
सर्वातिगानन्दसुसाधनाय, नमो नमः श्रीजिनशासनाय ॥१॥

स गोडिपार्श्वो जयताज्जगत्यां, सर्वार्थसंसिद्धिसुरद्रुकल्पः ।
समुल्लसद्भक्तिभरेण भव्या, नित्यं विभुं यं परिपूजयन्ति ॥२॥

शरच्छशाङ्कांशुसमुज्ज्वलेन, येन स्ववृत्तेन दिशो दशाऽपि ।
विद्योतिताः सूरिपुरन्दरः स, बभूव पूज्यो गुरुनेमिसूरिः ॥३॥

तदीयपट्टोदयशैलसूरः, सूरिः समस्ताऽऽगमसारवेदी ।
बभूव नाम्ना कृतिनाऽमृतश्च, पीयूषपाणिः कृतिकीर्तनीयः ॥४॥

श्रीदेवसूरिर्हि तदीयपट्टं, निजावदाताचरणेन सम्यक् ।
चकासयत्यार्हततीर्थमिद्धं, प्रभावयन् वत्सलतामहाब्धिः । ॥५॥

तच्छिष्यहेमचन्द्रः, शब्दन्यायादिशास्त्रकृतयत्नः ।
वाचकपदभृदरचयद्, वरमिदमालोचनाशतकम् ॥६॥

यो निजगुरुनिश्रायां, सहितः प्रद्युम्नहीरविजयाभ्याम् ।
स्वानुजतातमुनिभ्यां, मुम्बापुर्यां समृद्धायाम् ॥७॥

श्रीगोडीजी-जैनो-पाश्रयमध्ये हि भूरिविज्ञप्त्या ।
अकरोत् चातुर्मासीं, विधुगुप्तिनभोऽक्षिमित(२०३१)वर्षे ॥८॥

गुरुवरवचःप्रबुद्धा, भव्याश्चक्रुस्तदाऽतिहर्षेण ।
विविधं व्रतनियमतपः-क्रियादि विपुलार्थसद्व्ययतः ॥९॥

पूज्याचार्यवरेण्या, मेरुप्रभसूरयस्तदा रेजुः ।
आदीश्वरजैनधर्म-शालायां परिकरेण युताः ॥१०॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआदीश्वरचैत्ये, प्रवरे गगनोन्नतेऽतिरमणीये ।
जातोऽञ्जनप्रतिष्ठो-त्सवो महानुभयनिश्रायाम् ॥११॥

फाल्गुनमासे गोडी-पार्श्वप्रासादसच्छिलान्यासः ।
प्रवरोत्साहेन कृतः, वर्योत्सवपूर्वकं भव्यैः ॥१२॥

श्रीगोडीप्रभुसान्निध्ये, कृपया गुरुदेवपादपद्मानाम् ।
आलोचितानि पाप-स्थानान्यष्टादशाऽपि मया ॥१३॥

यावन्मेरुगिरीन्द्रो, यावत्सूर्यस्तथा शशी लोके ।
तावन्नन्दतु कृतिरिय-मधीयमाना बुधैर्नित्यम् ॥१४॥

॥ इत्यष्टादशपापस्थानकालोचना समाप्ता ॥

C/o. श्रीजितेन्द्र कापडिया, १०, लाभ कोम्प्लेक्ष, १२-बी, सत्तर तालुका सोसा.,
पो. नवजीवन, अहमदाबाद-३८००१४.



मरिष्यामीति यद् दुःखं पुरुषस्योपजायते ।
शक्यस्तेनाऽनुमानेन परोऽपि परिरक्षितुम् ॥

(शीलाङ्काचार्यकृतायाम् आचाराङ्गवृत्तौ)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाध्यायः

# योगबिन्दुदोहनम् ॥

मुनिरत्नकीर्तिविजयः

## भूमिका

अस्य **योगबिन्दुग्रन्थस्य** प्रणेतारः सूरिपुरन्दराः भवविरहाङ्काः **आचार्यश्री-हरिभद्रसूरिभगवन्तः** जिनशासनस्य परमगीतार्थाः सर्वमान्याः महापुरुषाः आसन् । येषां नाम विना न्यूनता अनुभूयेत येषां च वचनानां साहाय्यं विना जैनागमानां रहस्यप्रापणं दुःशक्यप्रायं, एतादृशैः एतैः महापुरुषैः स्वकीयजीवने चतुश्चत्वारिंशदधिकचतुर्दशशतग्रन्थाः रचिताः आसन् । यद्यपि सम्प्रति तेषां सर्वेऽपि ग्रन्थाः न विद्यन्ते, अल्पसङ्ख्याकाः एव उपलभ्यन्ते, तथापि तावत्सु अपि ग्रन्थेषु जिनवचनानां मर्मोद्घाटकः यज्ज्ञानवैभवः प्राप्यते तं प्राप्य अपि सानाथ्यम् अनुभवन्ति साम्प्रतकालीनाः ज्ञानपिपासवः । तत्र उपलभ्यमानम् एकैकम् अपि पदार्थनिरूपणं जिनागमान्तर्गतानां गम्भीरपदार्थानाम् ऐदम्पर्यार्थम् अधिगन्तुं दीपस्तम्भसदृशम् अस्ति ।

कतिचित्, विंशतिविंशिकान्तर्गतं योगविंशिकाप्रकरणम्, योगदृष्टिसमुच्चयः, योगशतकं, योगबिन्दुः, इत्यादयः योगविषयकाः ग्रन्थाः अपि तेषाम् उपलब्धाः सन्ति। तेषु तेषु ग्रन्थेषु योगमार्गस्य भिन्नभिन्नदृष्ट्या निरूपणं कृतम् अस्ति । दृष्टिभेदे सत्यपि न तत्र कुत्र अपि विरोधः दृश्यते । एतादृशं विशदनिरूपणं साम्प्रतं न सर्वत्र उपलभ्यते। तैः रचितेषु ग्रन्थेषु सर्वत्र अनुभूयमानम् एकं वैलक्षण्यम् अस्ति-समन्वयः । सर्वेषां दर्शनानां दर्शनकाराणां च दृष्टिषु अपि यत् सत्यं वर्तते तस्य शब्दभेदम् उपेक्ष्य स्वीकरणं, तस्य च स्वदृष्ट्या सह समन्वयं कृत्वा निरूपणम्-इत्येतत् तेषां ग्रन्थेषु प्रतिपदम अनुभूयते। यः तु तत्त्वरसिकः भवति सः न कदाऽपि शब्दभेदं पुरस्कृत्य विरोधम् उद्भावयति । एतत् तु योगबिन्दुग्रन्थारम्भे एव स्थापितं तैः यत्-

मोक्षहेतुर्यतो योगो, भिद्यते न ततः क्वचित् ।
साध्याभेदात् तथाभावे, तूक्तिभेदो न कारणम् ॥३॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकत्र स्थले तैः एव उक्तं यत् – 'सत्यस्य अन्वेषकैः यतः कुतश्चित् अपि प्राप्यमाणम् अंशभूतम् अपि सत्यं स्वीकरणीयम् एव । यतः तत् सत्यं तु महासत्यस्य एव अंशरूपं भवति' – इति । अतः एव च अस्मिन् योगबिन्दुग्रन्थे अपि स्थले स्थले अन्यदर्शनकाराणां योगमार्गस्य प्रणेतॄणां च कथनानां समन्वयः दरीदृश्यते । योगमार्गे विवादः वर्जनीयः इति तेषां मतिः । यतः विवादः न तत्त्वप्राप्तेः उपायभूतः ।

वादांश्च प्रतिवादांश्च, वदन्तो निश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद् गतौ ॥६७॥

एवं सत्यपि यस्यां विचारसरण्यां दृष्टौ वा आग्रहेण योगमार्गः रुध्येत बाधितः वा भवेत् फलप्राप्तिः वा विसंवादिनी स्यात् तर्हि तादृशस्य असदाग्रहस्य युक्त्या प्रयुक्त्या तर्केण वा निरासम् अपि ते कृतवन्तः एव । यतः एकान्तः तु सत्यस्य विघातकः अस्ति। एकान्तदृष्टिं च अवलम्ब्य योगमार्गे प्रवृत्तः साधकः तु कदाचित् दिग्भ्रान्तः कदाचित् च मार्गच्युतः वा अपि भवति । अतः तादृशानां पक्षाणां निरसनं कृत्वा तैः सत्यम् उद्घाटितम् अस्ति ।

मोक्षस्य हेतुभूतः अस्ति योगमार्गः – इत्यत्र च सर्वे अपि योगशास्त्रकाराणाम् ऐकमत्यम् अस्ति । नास्ति कुत्रचित् विरोधलेशः अपि । एवं सत्यपि योगस्य गोचरादि-शुद्धिः अनिवार्या अस्ति । योगस्य विषयः तस्य स्वरूपं तस्य फलं च, इति त्रितयं यदि परस्परम् अविसंवादि स्यात् तर्हि एव योगशब्दस्य मुख्यः अर्थः – 'मोक्षेण योजनाद् योगः' – इति सङ्घटते । विषयादिषु परस्परं यदि संवादिता न स्यात् तर्हि योगमार्गे कृतः प्रयत्नः दिक्शून्या गतिः इव आभाति ।

मोक्षहेतुत्वमेवाऽस्य, किन्तु यत्नेन धीधनैः ।
सद्गोचरादिसंशुद्धं, मृग्यं स्वहितकाङ्क्षिभिः ॥४॥

गोचरश्च स्वरुपं चं, फलं च यदि युज्यते ।
अस्य योगस्ततोऽयं यन्मुख्यशब्दार्थयोगतः ॥५॥

एषा गोचरादिशुद्धिः मूलशुद्धिः इति उच्यते । यथा मातापितॄणां विशुद्ध-जातिकुलशीलादिभिः पुत्राणां जातिकुलशीलादीनां विशुद्धिः अनुमीयते तथैव मूलशुद्ध्या



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव योगभेदानां सम्यक्त्वम् अनुमीयते । यतः कारणशुद्धिः यत्र विद्यते तत्रैव कार्यशुद्धिः भवति । मूलशुद्धि विना एव योगभेदानां वर्णनं तु वन्ध्यापुत्रस्य जातिकुलशीलादीनां वर्णनम् इव आभासते । तत्र यद्यपि अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः इत्यादिरूपेण नामसङ्ख्यादीनां साम्यं विद्यते एव किन्तु तद्वर्णनं तु निर्विषयम् एव भवति ।

एवं तु मूलशुद्ध्येह, योगभेदोपवर्णनम् ।
चारुमात्रादिसत्पुत्र-भेदव्यावर्णनोपमम् ॥५११॥

अन्यद् वान्ध्येयभेदोप-वर्णनाकल्पमित्यतः ।
न मूलशुद्ध्यभावेन, भेदसाम्येऽपि वाचिके ॥५१२॥

अतः एव अत्र गोचरादित्रिकस्य संवादितां साधयितुम् एकान्तपक्षाणां निरसनं कृत्वा सत्यं स्थापितं पूज्यैः । अत्र महेशानुग्रहात् मोक्षः, आत्मनः एकान्तसत्त्वम् एकान्तासत्त्वं वा, अनादिशुद्धतादिभेदकल्पना, कुमारिलमतम्, साङ्ख्यमतम्, नैरात्म्यदर्शनात् मुक्तिः, क्षणिकवादः, एकान्तनित्यवादः- इत्याद्यनेकानां दार्शनिकमतानां पदार्थानां च विस्तृतां चर्चां कृत्वा युक्त्या प्रयुक्त्या च सत्यं प्रकाशितं ग्रन्थकृद्भिः । किन्तु अत्र स्थले तु तान् सर्वान् अपि वादान् परित्यज्य ग्रन्थान्तर्गतः योगपदार्थः एव केवलं जिज्ञासूनां कृते यथातथं प्रस्तुतः अस्ति । इति ।

**योगलक्षणम्-**

योजनाद् योग इत्युक्तो, मोक्षेण मुनिसत्तमैः ।
स निवृत्ताधिकारायां, प्रकृतौ लेशतो ध्रुवम् ॥२०१॥

यः मोक्षेण योजयति सः योगः इति मुनिपुङ्गवानाम् उक्तिः । एतादृग्लक्षणः योगः पुरुषात् प्रकृतेः अधिपत्यं यदा किञ्चित् निवृत्तं भवति तत्पश्चात् एव भवति । यतः प्रकृतेः अधिकारः यावत् न्यूनः न भवति न तावत् मोक्षमार्गं प्रति तत्त्वमार्गं प्रति वा रुचिः श्रद्धा जिज्ञासा वा प्रवर्तते । स्वत्वस्य सम्यग्बोधार्थं प्रकृतेः अधिकारस्य निवृत्तिः अनिवार्या अस्ति । यथा अन्यरोगाणां कारणीभूतैः -कुष्ठादिरोगैः अभिभूतस्य जनस्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मतिभ्रंशः भवति तथैव प्रकृतेः आधिपत्यं यावत् पुरुषस्य उपरिष्टात् वर्तते तावत् सः प्रकृतेः व्यापारं स्वकीयम् एव व्यापारं मन्यते । योगमार्गस्य सम्यग् ज्ञानं तस्य न भवति ।

*अनिवृत्ताधिकारायां, प्रकृतौ सर्वथैव हि ।*
*न पुंसस्तत्त्वमार्गेऽस्मिन्, जिज्ञासाऽपि प्रवर्तते ॥१०१॥*

*क्षेत्ररोगाभिभूतस्य, यथाऽत्यन्तं विपर्ययः ।*
*तद्वदेवाऽस्य विज्ञेय-स्तदावर्तनियोगतः ॥१०२॥*

*जिज्ञासायामपि ह्यत्र, कश्चित्सर्गो निवर्तते ।*
*नाऽक्षीणपाप एकान्ता-दाप्नोति कुशलां धियम् ॥१०३॥*

*ततस्तदात्वे कल्याण-मायत्यां तु विशेषतः ।*
*मन्त्राद्यपि सदा चारु, सर्वावस्थाहितं मतम् ॥१०४॥*

(**योगिराजगोपेन्द्र**स्य वचनरूपाः एते चत्वारः श्लोकाः ग्रन्थे उद्धृताः पूज्यैः ।)

योगलक्षणे प्रयुक्तः निवृत्ताधिकारशब्दः ध्यानार्हः । एषः शब्दप्रयोगः एव पूज्यानाम् औदार्यस्य प्रमाणम् । निवृत्ताधिकारस्तु जैनदर्शने ग्रन्थिभेदरूपेण उपलक्षितः अस्ति । आत्मनि रागद्वेषाणां वर्तमानः तीव्राध्यवसायः नाम ग्रन्थिः, तस्याः भेदनं ग्रन्थिभेदः । एतादृशः ग्रन्थिभेदः येन कृतः अस्ति तस्य चित्तं तु सततं मोक्षे एव लीनं भवति, न संसारे । संसारे तु सः शरीरेण एव प्रवर्तते किन्तु तस्य अध्यवसायाः मोक्षैकनिष्ठाः एव भवन्ति । अतः एव तस्य सर्वाः अपि प्रवृत्तयः मोक्षफलदायिन्यः एव भवन्ति । अतः एव च तस्य योगः अपि भावयोगः इति उच्यते ।

भिन्नग्रन्थेस्तु यत्प्रायो, मोक्षे चित्तं भवे तनुः ।
तस्य तत्सर्व एवेह, योगो योगो हि भावतः ॥२०३॥

**योगमाहात्म्यम्-**

योगः कल्पतरुः श्रेष्ठो, योगश्चिन्तामणिः परः ।
योगः प्रधानं धर्माणां, योगः सिद्धेः स्वयंग्रहः ॥३७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा च जन्मबीजाग्नि-र्जरसोऽपि जरा परा ।
दुःखानां राजयक्ष्माऽयं, मृत्योर्मृत्युरुदाहृतः ॥३८॥

कुण्ठीभवन्ति तीक्ष्णानि, मन्मथास्त्राणि सर्वथा ।
योगवर्मावृते चित्ते, तपश्छिद्रकराण्यपि ॥३९॥

अक्षरद्वयमप्येत-च्छ्रूयमाणं विधानतः ।
गीतं पापक्षयायोच्चै-र्योगसिद्धौ महात्मभिः ॥४०॥

मलिनस्य यथा हेम्नो, वह्नेः शुद्धिर्नियोगतः ।
योगाग्नेश्चेतसस्तद्व-दविद्यामलिनात्मनः ॥४१॥

अमुत्र संशयापन्न-चेतसोऽपि ह्यतो ध्रुवम् ।
सत्स्वप्नप्रत्ययादिभ्यः, संशयो विनिवर्तते ॥४२॥

एतेषु श्लोकेषु न केवलं योगस्य माहात्म्यं प्रभावः वा वर्णितः किन्तु योगमार्गे प्रविष्टस्य स्थितिः कीदृशी भवेत् सः अपि ध्वनिः अत्र श्रूयते । दुःखे सत्यपि यत्र तस्य पीडा न अनुभूयते, मृत्योः भयं यतः व्यपगतम् अस्ति, मोहसंस्काराः यत्र क्षीणाः जाताः, अविद्यादिक्लेशाः यत्र दग्धबीजभावं प्राप्ताः स्युः, पारलौकिकविषयेषु अपि यस्य मतिः निःसंशया स्यात्–एतादृशी स्थितिः यस्य दृश्येत सः एव योगमार्गप्रवृत्तः योगमार्गस्य साधकः वा ज्ञेयः ।

**पूर्वसेवा-**

पूर्वसेवा तु तन्त्रज्ञै-र्गुरुदेवादिपूजनम् ।
सदाचारस्तपो मुक्त्य-द्वेषश्चेह प्रकीर्तिता ॥१०९॥

पूर्वसेवा नाम प्राथमिकी भूमिका । ताम् अनारूह्य न कोऽपि योगमार्गस्य पारं प्राप्तुम् अलं भवति । गुरुदेवादीनां पूजनम्, सदाचारः, तपः, मुक्ति प्रति अद्वेषः च – इतिरूपेण पूर्वसेवा अत्र वर्णिता । एते गुणाः यस्य नास्ति सः योगमार्गे प्रवृत्तिं कर्तुं न अर्हति । यदि कुर्यात्, तथाऽपि तत्र साफल्यं न प्राप्नुयात् । व्यावहारिकजीवनस्य अपि गुणाः यस्मिन् न सन्ति सः कथं नाम योगमार्गं साधयितुं प्रभवेत् ? अतः एतेषां चतुर्णां वर्णनं कृतम् अस्ति । तत्र–


Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१) **गुरुदेवादीनां पूजनम्** - तत्र के गुरुजनाः इत्यत्र उक्तम्-

*माता पिता कलाचार्य, एतेषां ज्ञातयस्तथा ।*
*वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥११०॥*

माता, पिता, कलाचार्यः नाम शिक्षकः, एतेषां त्रयाणां ज्ञातयः - तन्नाम तेषां भ्रातृभगिन्यादयः, वृद्धाः तु ज्ञानेन वृद्धाः वा वयसा वृद्धाः वा, धर्मोपदेशकाः च - इत्येते गुरुजनाः गौरवार्हाः जनाः सन्ति । तिसृषु अपि सन्ध्यासु तेषां नमनकरणम्, अनुपस्थितेषु अपि तेषु हृदये समारोप्य भावतः नमस्करणम्, तेषाम् आगमने स्वकीयासनात् उत्थाय सम्मुखगमनम्, आसनप्रदानम्, पर्युपासनकरणम्, निरभिमानितया समीपे उपवेशनम्, अनुचितस्थाने-मूत्र-पुरीषाद्युत्सर्गस्थाने तेषां नाम्नः अग्रहणम्, तेषां पूज्यानाम् अवर्णवादः न श्रवणीयः (अत्र श्रवणस्य अपि निषेधः कृतः अस्ति तर्हि करणस्य तु का कथा ?), तेभ्यः शोभनानि वस्त्र-पान-भोजना-लङ्कारादीनि समर्पणीयानि, तेषां पारलौकिकं हितं यथा स्यात् तथा दीनानाथाभ्यागतानां सेवादिसत्कार्याणि कारयितव्यानि, ते यं व्यवहारम् अनिष्टं मन्यन्ते तस्य त्यागः विधेयः, यः च तेषाम् अभीप्सितः व्यवहारः तत्र अवश्यं प्रवर्तितव्यम् - इत्यादिरूपम् अस्ति तेषां पूजनम् । एतत् सर्वम् अपि औचित्यपूर्वकम् एव करणीयं येन धर्मपुरुषार्थः बाधितः न स्यात् । अन्यत् च गुरुजनानां शयनासन-भोजनपात्रादीनाम् उपयोगः स्वयं न कर्तव्यः, तेषां सम्पद् अपि तीर्थक्षेत्रादिषु पुण्यक्षेत्रेषु योजनीया, तेषां बिम्बं स्थापनीयम्, तस्य च धूप-दीप-पुष्पादिपूजनरूपेण संस्कारः कर्तव्यः इत्यादिरूपेण अपि तेषां पूजनं भवति ।

पूजनं चाऽस्य विज्ञेयं, त्रिसन्ध्यं नमनक्रिया ।
तस्याऽनवसरेऽप्युच्चै-श्चेतस्यारोपितस्य तु ॥१११॥

अभ्युत्थानादियोगश्च, तदन्ते निभृतासनम् ।
नामग्रहश्च नाऽस्थाने, नाऽवर्णश्रवणं क्वचित् ॥११२॥

साराणां च यथाशक्ति, वस्त्रादीनां निवेदनम् ।
परलोकक्रियाणां च, कारणं तेन सर्वदा ॥११३॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यागश्च तदनिष्टानां, तदिष्टेषु प्रवर्तनम् ।
औचित्येन त्विदं ज्ञेयं, प्राहुर्धर्माद्यपीडया ॥११४॥

तदासनाद्यभोगश्च, तीर्थे तद्वित्तयोजनम् ।
तद्बिम्बन्याससंस्कार ऊर्ध्वदेहक्रिया परा ॥११५॥

अधुना **देवपूजा**विधिं दर्शयति-

पुष्पैश्च बलिना चैव, वस्त्रैः स्तोत्रैश्च शोभनैः ।
देवानां पूजनं ज्ञेयं, शौचश्रद्धासमन्वितम् ॥११६॥

शरीरशुद्धि-वस्त्रशुद्धि-द्रव्यशुद्धि-व्यवहारशुद्धिपूर्वकं श्रद्धापूर्वकं च देवता पूजनीया। पुष्पैः, बलिभिः - तन्नाम पक्वान्नादिभिः, फलादिभिः, वस्त्रैः, सुन्दरैः गम्भीरार्थैः च स्तोत्रैः - इत्यादिभिः अनेकैः प्रकारैः देवतानां पूजनं भवति ।

अथ के देवाः पूजनीयाः इत्यत्र उच्यते-

अविशेषेण सर्वेषा-मधिमुक्तिवशेन च ।
गृहिणां माननीया यत्, सर्वे देवा महात्मनाम् ॥११७॥

चारिसञ्जीवनीचार- न्याय एष सतां मतः ।
नाऽन्यथाऽत्रेष्टसिद्धिः स्याद्, विशेषेणाऽऽदिकर्मणाम् ॥११९॥

गुणाधिक्यपरिज्ञानाद्, विशेषेऽप्येतदिष्यते ।
अद्वेषेण तदन्येषां, वृत्ताधिक्यं तथात्मनः ॥१२०॥

मतिमोहादिना कारणेन यस्य चित्ते अद्याऽपि देवताविशेषस्य निर्णयः न जातः तेन तु सामान्येन एव सर्वेषाम् अपि अर्हत्-बुद्ध-ब्रह्म-विष्णु-महेश्वरादीनां पूजा विधेया। अथवा यस्य यत्र श्रद्धा प्रबला तद्देवतायाः पूजनं कर्तव्यम् । यतः एवं कृते सति चारिसञ्जीवनीचारन्यायात् कदाचित् वास्तविकदेवतायाः परिचयः तस्य भवेत् अपि । एवं च यदा गुणाधिक्यस्य परिज्ञानं भवति तत्पश्चात् एव अर्हदादिदेवताविशेषे पूजनम् इष्टम् । यतः तत्काले तु तस्य चित्ते अन्यदेवतादिषु अद्वेषः एव प्रवर्तते ।

गुरुदेवादिपूजनान्तर्गतम् अन्यत् अपि यत् वक्तव्यं तत् दर्शयति-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये पात्रजीवाः सन्ति, यथा- ये व्रतधारिणः व्रतसूचकवेषधारिणः च ते सामान्यतः पात्रजीवाः, ये च स्वयं भोजनं न पचन्ति न च पाचयन्ति किन्तु स्वसिद्धान्ताविरोधेन एव ये सर्वदा प्रवर्तन्ते ते विशेषेण पात्रजीवाः - तेभ्यः, तथा ये दीनान्धकृपणाः, विशेषेण व्याधिग्रस्ताः, धनहीनाः, स्वयं च आजीविकां निर्वोढुम् अशक्ताः तेभ्यः दानं दद्यात् । एतत् दानम् अपि तथा करणीयं यथा स्वगृहस्थितः मातृ-पितृ-पुत्र-पुत्र्यादिपोष्यवर्गः न सीदेत् । 'गृहं प्रज्ज्वाल्य तीर्थाटनं न कर्तव्यम्' इति सारः। दत्तं च दानं तद्दातुः तद्ग्राहकस्य च उभयोः अपि उपकारार्थं स्यात् न किन्तु व्याधिषु अपथ्यम् इव अहितकरं स्यात् । एतादृशम् एव दानम् इष्टम् इष्टफलदायकं च भवति। एवं रीत्या दत्तम् एव च विधिदानम् उच्यते ।

पात्रे दीनादिवर्गे च, दानं विधिवदिष्यते ।
पोष्यवर्गाविरोधेन, न विरुद्धं स्वतश्च यत् ॥१२१॥

व्रतस्था लिङ्गिनः पात्र-मपचास्तु विशेषतः ।
स्वसिद्धान्ताविरोधेन, वर्तन्ते ये सदैव हि ॥१२२॥

दीनान्धकृपणा ये तु, व्याधिग्रस्ता विशेषतः ।
निःस्वाः क्रियान्तराशक्ता, एतद्वर्गो हि मीलकः ॥१२३॥

दत्तं यदुपकाराय, द्वयोरप्युपजायते ।
नाऽऽतुरापथ्यतुल्यं तु, तदेतद्विधिवन्मतम् ॥१२४॥

**( २ ) सदाचार :-** भिन्नभिन्नैः अनेकैः प्रकारैः अत्र सदाचारः वर्णितः अस्ति। सर्वेऽपि एते प्रकाराः हृदये दृढं भावनीयाः । १. लोकापवादात् भयम्, २. दीनानाथादीनाम् उपकारे प्रयत्नः, ३. कृतज्ञता, ४. दाक्षिण्यम्, ५. हीनमध्यमोत्तमेभ्यः कस्यचित् अपि निन्दायाः अकरणम्, ६. सज्जनानां गुणकथायाः वर्णवादस्य च करणम्, ७. आपत्काले अपि दैन्यरहितत्वम्, ८. सम्पत्प्राप्तौ अपि नम्रता, ९. अवसरेऽपि अल्पम् अविसंवादि च भाषणम्, १०. स्वगृहीतव्रतनियमादीनां दार्ढ्येन पालनम्, ११. कुलधर्मस्य अनुपालनम्, १२. अर्जितधनस्य अपव्ययस्य त्यागः, १३. उचितस्थले कार्पण्यं त्यक्त्वा धनस्य सद्व्ययः, १४. विशिष्टफलदायकेषु प्रयोजनेषु आग्रहः, १५. मद्य-विषय-कषाय-निद्रा-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकथास्वरूपाणां पञ्चानाम् अपि प्रमादानां सन्त्यागः, १६. अविरोधिनः लोकव्यवहारस्य पालनम्, १७. सर्वत्र औचित्यस्य पालनम्, १८. प्राणत्यागेऽपि निन्द्यप्रवृत्तीनां त्यागः – इति सदाचारप्रकाशः ।

लोकापवादभीरुत्वं, दीनाभ्युद्धरणादरः ।
कृतज्ञता सुदाक्षिण्यं, सदाचारः प्रकीर्तितः ॥१२६॥

सर्वत्र निन्दासन्त्यागो, वर्णवादश्च साधुषु ।
आपद्यदैन्यमत्यन्तं, तद्वत्सम्पदि नम्रता ॥१२७॥

प्रस्तावे मितभाषित्व-मविसंवादनं तथा ।
प्रतिपन्नक्रिया चेति, कुलधर्मानुपालनम् ॥१२८॥

असद्व्ययपरित्यागः, स्थाने चैतत्क्रिया सदा ।
प्रधानकार्ये निर्बन्धः, प्रमादस्य विवर्जनम् ॥१२९॥

लोकाचारनुवृत्तिश्च, सर्वत्रौचित्यपालनम् ।
प्रवृत्तिर्गर्हिते नेति, प्राणैः कण्ठगतैरपि ॥१३०॥

**( ३ ) तपः–**

तपोऽपि च यथाशक्ति, कर्तव्यं पापतापनम् ।
तच्च चान्द्रायणं कृच्छ्रं, मृत्युघ्नं पापसूदनम् ॥१३१॥

योगमार्गप्रवेशेप्सुभिः कर्मविघातकृत् तपः अपि स्वशक्त्यनुरूपम् आचरणीयम्। यतः तपसा मोहादिकर्मणां प्रभावः मन्दः सञ्जायते । एवं च सञ्जातनिर्मलचित्तः जनः सौकर्येण योगमार्गं प्रविशति । अत्र चतुष्प्रकारकं तपः दर्शितम् अस्ति, तद्यथा–चान्द्रायणं, कृच्छ्रं, मृत्युघ्नं, पापसूदनं च इति । तत्र–

**१. चान्द्रायणतपसः** विधिः –

एकैकं वर्धयेद् ग्रासं, शुक्ले कृष्णे च हापयेत् ।
भुञ्जीत नाऽमावास्याया-मेष चान्द्रायणो विधिः ॥१३२॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्लपक्षे अस्य तपसः आरम्भः करणीयः । तत्र प्रथमदिने एकग्रासप्रमाणः एव आहारः कर्तव्यः पश्चात् च प्रतिदिनम् एकैकग्रासवृद्धया पूर्णिमादिनपर्यन्तम् आहारः ग्रहीतव्यः । तदनु च कृष्णपक्षे एकैकग्रासहान्या आहारः भोक्तव्यः । एवं च क्रमेण कृष्णचतुर्दशीदिने तु एकग्रासप्रमाणः एव आहारः भवेत् । अमावास्यादिने च अनाहारः एव तिष्ठेत् ।

२. **कृच्छ्रतपसः** विधि :-

सन्तापनादिभेदेन, कृच्छ्रमुक्तमनेकधा ।
अकृच्छ्रादतिकृच्छ्रेषु, हन्त सन्तारणं परम् ॥१३३॥

सन्तापनकृच्छ्रं, पादकृच्छ्रं, सम्पूर्णकृच्छ्रम् – इत्याद्यनेकभेदाः सन्ति कृच्छ्रतपसः । तत्र–

*त्र्यहमुष्णं पिबेदम्बु, त्र्यहमुष्णं घृतं पिबेत् ।*
*त्र्यहमुष्णं पिबेन्मूत्रं, त्र्यहमुष्णं पिबेत्पयः ॥१॥*

इति सन्तापनकृच्छ्रं तपः ।

तथा – एकभक्तेन भुक्तेन, तथैवाऽयाचितेन च ।
उपवासेन चैकेन, पादकृच्छ्रं विधीयते ॥२॥ इति पादकृच्छ्रं तपः ।

इदम् एव च पादकृच्छ्रं तपः यदा पुनः पुनः चतुर्वारं विधीयते तदा सम्पूर्णकृच्छ्रं तपः भवति ।

३. **मृत्युघ्नतपसः** विधिः -

मासोपवासमित्याहु - मृत्युघ्नं तु तपोधनाः ।
मृत्युञ्जयजपोपेतं, परिशुद्धं विधानतः ॥१३४॥

४. **पापसूदनतपसः** विधि :-

पापसूदनमप्येवं, तत्तत्पापाद्यपेक्षया ।
चित्रमन्त्रजपप्रायं, प्रत्यापत्तिविशोधितम् ॥१३५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानावरणीय-दर्शनावरणीय-वेदनीय-मोहनीय-आयु-र्नाम-गोत्रा-न्तरायरूपाणि अष्ट कर्माणि सन्ति। तत्र प्रत्येकं कर्म आश्रित्य अष्टदिनप्रमाणं तपः क्रियते। तत्र प्रथमदिने उपवासः, द्वितीयदिने एकाशनम्, तृतीयदिने [१]एकसिक्थम्, चतुर्थदिने [२]एकस्थानकम्, पञ्चमदिने [३]एकदत्तिः, षष्ठदिने [४]निर्विकृतिका, सप्तमदिने [५]आचाम्लम्, अष्टमदिने अष्टकवलानि - एवम् अष्टवारं क्रियते। आहत्य च चतुःषष्टिदिनप्रमाणम् एतत् तपः भवति। तथा 'ॐ ह्रीं अ सि आ उ सा नमः' इत्यादिनानाविधमन्त्राणां जापः अपि तपःकाले कर्तव्यः भवति।

**(४) मुक्त्यद्वेषः** - योगमार्गस्य चरमं मुख्यं च लक्ष्यम् अस्ति मोक्षः। तादृशः मोक्षः सकलकर्मणां क्षयेण एव प्राप्यते। एतादृशि मोक्षविषये अपि कतिषुचित् शास्त्रेषु एवंरूपाणि वचनानि श्रूयन्ते-यथा-

> [६]जइ तत्थ नत्थि सीमंतिणीओ मणहरपियंगुवण्णाओ।
> ता रे! सिद्धंतिय! बंधणं खु मोक्खो न सो मोक्खो॥
>
> वरं वृन्दावने रम्ये, क्रोष्टुत्वमभिवाञ्छितम्।
> न त्वेवाऽविषयो मोक्षः, कदाचिदपि गौतम! ॥१३८॥ इत्यादीनि।

किन्तु एतद्रूपः मुक्तिं प्रति द्वेषः तु असारेऽपि संसारे बहुमानं धारयतां भवाभिनन्दिनां जीवानाम् अज्ञानमूलकः भवति। महामोहाभिभूतानां स्वाकल्याणकर्तृणां च जीवानाम् एव एषः संसारवर्धकः द्वेषः उत्पद्यते। किन्तु येषां चित्ते अयं द्वेषः नास्ति ते धन्याः सन्ति, भवबीजं च त्यक्त्वा ते एव कल्याणभागिनः भवन्ति।

---

१. धान्यस्य एककणप्रमाणम् एव भोजनम्।

२. अन्याङ्गानां स्पन्दनं वर्जयित्वा केवलं मुखस्य दक्षिणहस्तस्य च एव चालनपूर्वकम् एकवारं यत् भोजनं क्रियते तत्।

३. रुक्षम् अपि भोजनं यावत् भक्षणीयं स्यात् तावत् सकृत् एव ग्रहणीयम्।

४. एकवारम् एव घृतदुग्धादिविकृतिषट्करहितं भोजनम्।

५. सर्वथा नीरसः आहारः।

६. यदि तत्र नाऽस्ति सीमन्तिन्यो मनोहरप्रियङ्गुवर्णाः।
ततः रे! सैद्धान्तिक! बन्धनं खलु मोक्षः न स मोक्षः॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतः एव च यस्य मुक्त्यादिषु – मुक्तौ, मुक्त्युपायेषु, मुक्तिपथप्रस्थितेषु जनेषु च – द्वेषः नाऽस्ति सः एव गुरुदेवादीनां पूजनम् अपि शोभनया रीत्या औचित्येन च कर्तुं शक्नोति । यतः लघु अपि सत्कृत्यं महादोषवतां न गुणाय भवति । अतः च मुक्तिं द्विषन् जनः गुरुदेवादीनां पूजनं कुर्यात् चेदपि न तत् सत्कृत्यत्वेन गणयितुम् अर्हति । गुरुदेवादीनां पूजनेन यावान् लाभः न भवति तावान् लाभः तु मुक्त्यद्वेषेण भवति । अतः मुक्त्यद्वेषमूलकः अयं गुरुदेवादिपूजनलाभः । एवं च मुक्त्यद्वेषः तु पूर्वसेवायाः मुख्यः गुणः ।

कृत्स्नकर्मक्षयान्मुक्ति-र्भोगसङ्क्लेशवर्जिता ।
भवाभिनन्दिनामस्यां, द्वेषोऽज्ञाननिबन्धनः ॥१३६॥

श्रूयन्ते चैतदालापा, लोके तावदशोभनाः ।
शास्त्रेष्वपि हि मूढाना-मश्रोतव्याः सदा सताम् ॥१३७॥

वरं वृन्दावने रम्ये, कोष्टुत्वमभिवाञ्छितम् ।
न त्वेवाऽविषयो मोक्षः, कदाचिदपि गौतम ! ॥१३८॥

महामोहाभिभूताना-मेवं द्वेषोऽत्र जायते ।
अकल्याणवतां पुंसां, तथा संसारवर्धनः ॥१३९॥

नास्ति येषामयं तत्र, तेऽपि धन्याः प्रकीर्तिताः ।
भवबीजपरित्यागात्, तथा कल्याणभागिनः ॥१४०॥

येषामेवं न मुक्त्यादौ, द्वेषो, गुर्वादिपूजनम् ।
त एव चारु कुर्वन्ति, नाऽन्ये तद्गुरुदोषतः ॥१४७॥

सच्चेष्टितमपि स्तोकं, गुरुदोषवतो न तत् ।
भौतहन्तुर्यथाऽन्यत्र, पादस्पर्शनिषेधनम् ॥१४८॥

गुर्वादिपूजनान्नेह, तथा गुण उदाहृतः ।
मुक्त्यद्वेषाद्यथाऽत्यन्तं, महापायनिवृत्तितः ॥१४९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**योगभेदाः -**

अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः च इति पञ्चप्रकारः योगः अस्ति। पञ्च अपि एते प्रकाराः आत्मानं मोक्षेण योजयन्ति इति कृत्वा योगत्वेन प्रतिष्ठिताः। पञ्चसु अपि भेदेषु अनुक्रमेण परः परः भेदः श्रेष्ठः श्रेष्ठतरः च अस्ति। श्रेष्ठः नाम भावरूपत्वात् अयं योगः पारमार्थिकयोगः अस्ति।

अन्ये अपि-तात्त्विकः अतात्त्विकः, सानुबन्धः निरनुबन्धः, सास्रवः अनाश्रवः च- इत्यादयः योगभेदाः सन्ति। एते च योगभेदाः प्राणिनाम् आत्मपरिणतिम् अवलम्ब्य - जीवानाम् अवस्थाभेदम् आश्रित्य संज्ञाभेदेन वर्णिताः सन्ति। तत्र-

१. निर्वाणम् एव अभिलषतः जनस्य यः सद्भूतः योगः सः **तात्त्विकः योगः**। २. लोकचित्तस्य आराधनारूपः लोकाकर्षणाय एव वा क्रियमाणः योगः **अतात्त्विकः योगः**। ३. यस्य योगस्य परम्परा मुक्तिप्राप्तिपर्यन्तम् अविच्छिन्ना प्रवर्तते सः **सानुबन्धः योगः**। ४. यस्य च परम्परा विच्छिन्ना भवति सः **निरनुबन्धः योगः**। ५. यस्मिन् योगे संसारः दीर्घः अस्ति सः **सास्रवः योगः**। ६. यस्मिन् च संसारः अल्पः भवति सः **अनास्रवः योगः** इति।

अध्यात्मं भावना ध्यानं, समता वृत्तिसंक्षयः।
मोक्षेण योजनाद् योग, एष श्रेष्ठो यथोत्तरम् ॥३१॥

तात्त्विकोऽतात्त्विकश्चाऽयं, सानुबन्धस्तथाऽपरः।
सास्रवोऽनास्रवश्चेति, संज्ञाभेदेन कीर्तितः ॥३२॥

तात्त्विको भूत एव स्या-दन्यो लोकव्यपेक्षया।
अच्छिन्नः सानुबन्धस्तु, च्छेदवानपरो मतः ॥३३॥

सास्रवो दीर्घसंसार-स्ततोऽन्योऽनास्रवः परः।
अवस्थाभेदविषयाः, संज्ञा एता यथोदिताः ॥३४॥

**योगभेदानां फलसहितं विशेषवर्णनम् -**

(१) **अध्यात्मयोगः** - उचितप्रवृत्तिमतां अणुव्रतमहाव्रतादियुक्तानाम् आत्मनां



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनप्रणीतवचनानि आश्रित्य मैत्री-प्रमोद-करुणा-माध्यस्थ्यभावप्रधानं यत् जीवादितत्त्वानां चिन्तनं तत् अध्यात्मम् - इति अध्यात्मविदः वदन्ति ।

एतेन अध्यात्मयोगेन कर्मणां क्षयः भवति । सत्त्वं नाम वीर्योत्कर्षः , शीलं नाम चित्तस्य समाधिः, ज्ञानं नाम वस्तूनां यथार्थावबोधः - इति शाश्वतानाम् - अप्रतिपातिनाम् एतत्त्रयाणां प्राप्तिः अपि एतेन अध्यात्मयोगेन भवति । स्वानुभवसिद्धम् अमृतम् अपि एतत् अध्यात्मम् एव अस्ति ।

औचित्याद् व्रतयुक्तस्य, वचनात् तत्त्वचिन्तनम् ।
मैत्र्यादिसारमत्यन्त-मध्यात्मं तद्विदो विदुः ॥३५८॥

अतः पापक्षयः सत्त्वं, शीलं ज्ञानं च शाश्वतम् ।
तथाऽनुभवसंसिद्ध-ममृतं ह्रद एव तु ॥३५९॥

**अध्यात्मस्य विशेषवर्णनम् -**

औचित्यादियुक्तस्य आत्मनः मैत्र्यादिगर्भितं तत्त्वचिन्तनम् अध्यात्मम्- इति पूर्वम् उक्तम् । एतत् अध्यात्मं द्रव्य-क्षेत्र-काल-भावाद्यवस्थाभेदैः अनेकप्रकारकम् अस्ति । तत्र च यः आदिधार्मिकः जीवः तम् आश्रित्य जपः एव अध्यात्मम् । सन्मन्त्रविषयकः जपः देवतास्तवरूपः अस्ति । यथा मन्त्रविशेषात् स्थावर-जङ्गमादिभेदभिन्नानां विषाणाम् अपहारः भवति तथैव एतेन मन्त्रजपेन अपि पापपरिहारः भवति ।

तत्त्वचिन्तनमध्यात्म-मौचित्यादियुतस्य तु ।
उक्तं विचित्रमेतच्च, तथावस्थादिभेदतः ॥३८०॥

आदिकर्मकमाश्रित्य, जपो ह्यध्यात्ममुच्यते ।
देवतानुग्रहाङ्गत्वा-दतोऽयमभिधीयते ॥३८१॥

जपः सन्मन्त्रविषयः, स चोक्तो देवतास्तवः ।
दृष्टः पापापहारोऽस्माद्, विषापहरणं यथा ॥३८२॥

मतान्तरं दर्शयति -

स्वयोग्यतायाः सम्यक् विचारणम्, तदनु च धर्मक्रियायां प्रवृत्तिः, आत्मनिरीक्षणं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

च इति त्रितयम् अध्यात्मम् इति अन्ये योगशास्त्रकाराः वदन्ति । तथा हि-

१. त्रिभिः प्रकारैः स्वयोग्यतायाः आलोचनं भवति-योगप्रवृत्या, जनवादात्, आगमानुसारिनिमित्तैः च । तत्र योगप्रवृत्या नाम मनोवाक्कायरूपाणां योगानां सम्यक् प्रवर्तनेन, जनवादात् नाम लोकानां स्वं प्रति यः निर्मलः भावः आदरः वा तेन, आगमानुसारिनिमित्तैः च नाम पशुपक्ष्यादिशब्दरूपाः शकुनाः, तैः-एवं च त्रिभिः प्रकारैः स्वयोग्यतायाः यत् सम्यक् परीक्षणं तत् अध्यात्मम् ।

२. एवं च सम्यग्रीत्या स्वयोग्यताम् आलोच्य धर्मे प्रवर्तनं हि निश्चयेन इष्टफलप्रदायकं भवति । यतः स्वकीयं योग्यत्वायोग्यत्वम् आलोचयति आत्मनि भावस्य प्राधान्यात् धर्मे तस्य दृढानुरागः भवति । धर्मे यस्य प्रतिबन्धः नाऽस्ति सः औदयिकभावैः-तन्नाम कर्मणाम् उदयेन प्राप्यमाणैः पदार्थैः परिस्थितिभिः वा-उपहतचित्तत्वात् न स्वौचित्यम् आलोचयति । स्वयोग्यतां विना धर्मे प्रवर्तनं न कदाऽपि सफलं भवति । अतः यः योगभङ्गभयेन युक्तः स्यात् श्रद्धातिशयात् च योगसिद्ध्यर्थं दृढम् उत्सुकः स्यात् तथा परिणामालोचनपूर्वकम् एव च कार्ये प्रवर्तमानः स्यात् - एतादृशः बुद्धिमान् आत्मा शुद्धयुक्त्या स्वयोग्यतां सम्यक् विचारयति, तदनु चैव धर्मे प्रवृत्तिं करोति-इत्यपि अध्यात्मम् ।

३. अणुव्रत-महाव्रतादिपालनरूपे कार्ये प्रारब्धे सति अशुभकर्मणाम् उदयेन कदाचित् तत्र भङ्गादिरूपं भयम् उपस्थितं भवेत् अपि । तद्भयस्य उपशमार्थम् आत्मनिरीक्षणं कुर्यात् यत्- मया किं किं कृतम् ? किं कृत्यं च अवशिष्टम् ? - इत्यादि । यथा रोगाणां शत्रूणां वा भये उपस्थिते सति चिकित्सायाः दुर्गस्य वा शरणम् अङ्गीक्रियते तथैव यदि चित्तम् उन्मार्गगामि स्यात् तथा च धर्मकृत्ये यदि भङ्गभयम् उपस्थितं स्यात् तर्हि देव-गुर्वादीनां शरणम् एव आश्रयणीयम्, येन दुरितानां क्षयः स्यात्। एवं च कृतम् आत्मनिरीक्षणम् अपि अध्यात्मम् एव ।

स्वौचित्यालोचनं सम्यक्, ततो धर्मप्रवर्तनम् ।
आत्मसम्प्रेक्षणं चैव, तदेतदपरे जगुः ॥३८९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगेभ्यो जनवादाच्च, लिङ्गेभ्योऽथ यथागमम् ।
स्वौचित्यालोचनं प्राहु-र्योगमार्गकृतश्रमाः ॥३९०॥

योगः कायादिकर्माणि, जनवादस्तु तत्कथा ।
शकुनादीनि लिङ्गानि, स्वौचित्यालोचनास्पदम् ॥३९१॥

एकान्तफलदं ज्ञेय-मतो धर्मप्रवर्तनम् ।
अत्यन्तं भावसारत्वात् - तत्रैव प्रतिबन्धतः ॥३९२॥

तद्भङ्गादिभयोपेत-स्तत्सिद्धौ चोत्सुको दृढम् ।
यो धीमानिति सन्न्यायात्, स यदौचित्यमीक्षते ॥३९३॥

आत्मसम्प्रेक्षणं चैव, ज्ञेयमारब्धकर्मणि ।
पापकर्मोदयादत्र, भयं तदुपशान्तये ॥३९४॥

विस्रोतोगमने न्याय्यं, भयादौ शरणादिवत् ।
गुर्वाद्याश्रयणं सम्यक्, ततः स्याद् दुरितक्षयः ॥३९५॥

सर्वमेवेदमध्यात्मं, कुशलाशयभावतः ।
औचित्याद्यत्र नियमा-ल्लक्षणं यत्पुरोदितम् ॥३९६॥

मतान्तरं वर्णयति-

देवादीन् सम्यक् प्रकारेण वन्दनम्, प्रतिक्रमणम्, मैत्र्यादिभावानां च चिन्तनम्- एतत् त्रितयम् अध्यात्मम् - इत्यपि केषाञ्चन शास्त्रकाराणां मतम् अस्ति । तत्र-

१. देवादिवन्दनं - चैत्यवन्दनं नाम स्थान-काल-क्रमादिभिः युक्तः - योग्यस्थानेन योग्यकालेन योग्यक्रमेण च युक्तः सन् एव देवादीनां स्तवनादिकं कुर्यात्, तथा, देवादीनां स्तुत्यर्थम् उच्चार्यमाणेषु शब्देषु एव अवधानयुक्तः स्यात्, अन्येषाम् अनुष्ठानेषु विघ्नः यथा न स्यात् तथैव योग्यस्वरपूर्वकं - मधुरमन्दस्वरपूर्वकम्, श्रद्धासंवेगादिभावभृतहृदयेन, उल्लसद्भावैः च रोमाञ्चितशरीरेण, शुभाशयस्य वृद्धिपूर्वकम्, अवनाम-यथाजातादिभिः मुद्राभिः विशुद्धं देवतादीनां वन्दनं कुर्यात् ।

२. प्रतिक्रमणं नाम-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्थानाद् यत्परस्थानं, प्रमादस्य वशाद् गतः ।
भूयोऽप्यागमनं तत्र, प्रतिक्रमणमुच्यते ॥

अत्र स्वस्थानं नाम आत्मरमणता, परस्थानं च नाम पुद्गलरमणता । प्रमादवशात् आत्मभावं त्यक्त्वा पुद्गलभावेषु जीवस्य यत् गमनं भवति ततः प्रतिनिवर्तनम् एव प्रतिक्रमणम् उच्यते । प्रमादवशात् गुप्ति-समिति-गुरुविनयादिषु ये भङ्गादिदोषाः सञ्जाताः यत् च अनाभोगवशात् निषिद्धस्य आसेवनं जातम्- इत्यादीनां प्रायश्चित्तस्य या क्रिया सा प्रतिक्रमणम् । एतत् प्रतिक्रमणं भावशुद्धेः परमं कारणम् अस्ति ।

३. मैत्र्यादिचिन्तनं नाम सामान्येन सर्वेषु अपि जीवेषु मैत्रीं भावयेत्, तत्र अपि ये गुणाधिकाः जनाः तेषु प्रमोदं भजेत्, ये च दुःखसन्तप्ताः जीवाः तेषु करुणाम् आचरेत्, ये च आत्मानः दुर्बोधाः बोधार्थं वा अयोग्याः तेषु द्वेषरहितं माध्यस्थ्यं धरेत्। एतानि त्रीणि अपि अध्यात्मम् इति उच्यते ।

देवादिवन्दनं सम्यक्, प्रतिक्रमणमेव च ।
मैत्र्यादिचिन्तनं चैतत्, सत्त्वादिष्वपरे विदुः ॥३९७॥

स्थानकालक्रमोपेतं, शब्दार्थानुगतं तथा ।
अन्यासम्मोहजनकं, श्रद्धासंवेगसूचकम् ॥३९८॥

प्रोल्लासद्भावरोमाञ्चं, वर्धमानशुभाशयम् ।
अवनामादिसंशुद्ध-मिष्टं देवादिवन्दनम् ॥३९९॥

प्रतिक्रमणमप्येवं, सति दोषे प्रमादतः ।
तृतीयौषधकल्पत्वाद्, द्विसन्ध्यमथवा सति ॥४००॥

निषिद्धसेवनादि यत्, विषयोऽस्य प्रकीर्तितः ।
तदेतद्भावसंशुद्धेः, कारणं परमं मतम् ॥४०१॥

मैत्रीप्रमोदकारुण्य-माध्यस्थ्यपरिचिन्तनम् ।
सत्त्वगुणाधिकक्लिश्य-मानाप्रज्ञाप्यगोचरम् ॥४०२॥

एवं च शब्दव्युत्पत्त्या जायमानैः भिन्नैः भिन्नैः अर्थैः कृत्वा अध्यात्मम्


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनेकप्रकारकं भवति । 'आत्मनि अधि इति अध्यात्मम्' – इति अध्यात्मशब्दस्य अर्थः पूर्वोक्तेषु सर्वेषु अपि भेदेषु घटते एव ।

एवं विचित्रमध्यात्म-मेतदन्वर्थयोगतः ।
आत्मन्यधीति संवृत्ते-र्ज्ञेयमध्यात्मचिन्तकैः ॥४०४॥

( २ ) **भावनायोगः** – एतादृशस्य अध्यात्मयोगस्य प्रतिदिनम् उत्कर्षस्य अनुभवेन सहितः मनःसमाधिना युक्तः पुनः पुनः यः अभ्यासः सः एव भावनायोगः इति उच्यते ।

अनेन भावनायोगेन अशुभकामक्रोधादिविषयकात् अभ्यासात् निवृत्तिः भवति, ज्ञानादिविषयके शुभे अभ्यासे च आनुकूल्यं प्राप्यते, सच्चित्तस्य च समुत्कर्षः अपि अनुभूयते ।

अभ्यासोऽस्यैव विज्ञेयः, प्रत्यहं वृद्धिसङ्गतः ।
मनःसमाधिसंयुक्तः, पौनःपुन्येन भावना ॥३६०॥

निवृत्तिरशुभाभ्यासा-च्छुभाभ्यासानुकूलता ।
तथा सुचित्तवृद्धिश्च, भावनायाः फलं मतम् ॥३६१॥

( ३ ) **ध्यानयोगः** – कस्मिंश्चित् अपि एकस्मिन् शुभे विषये-यत्र रागः वा द्वेषः वा न जायेत तादृशे विषये चित्तस्य यत् ऐकाग्र्यं तत् एव ध्यानम् इति कथ्यते । अत्र च विषये चित्तं स्थिरप्रदीपोपमम् एकाग्रं भवति, आलम्बनीभूतस्य च वस्तुनः उत्पाद-व्यय-ध्रौव्यरूपेण सूक्ष्मचिन्तनेन संयुक्तं च अपि भवति ।

सर्वेषु अपि कार्येषु स्वाधीनत्वम्, भावानां स्थैर्यम्, भवपरम्परावर्धकानां कर्मणाम् अनुबन्धस्य व्यवच्छेदः च इत्येतानि फलानि ध्यानयोगस्य ।

शुभैकालम्बनं चित्तं, ध्यानमाहुर्मनीषिणः ।
स्थिरप्रदीपसदृशं, सूक्ष्मयोगसमन्वितम् ॥३६२॥

वशिता चैव सर्वत्र, भावस्तैमित्यमेव च ।
अनुबन्धव्यवच्छेद, उदर्कोऽस्येति तद्विदः ॥३६३॥

( ४ ) **समतायोगः** – मनसः इन्द्रियाणां च इष्टानिष्टेषु शब्दादिविषयेषु ये



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागद्वेषादिभावाः उत्पद्यन्ते तत्र अनादिवितथवासनारूपायाः अविद्यायाः उत्पद्यमानाः विकल्पाः एव कारणम् । यदा च शब्दादिविषयाणां सम्यग्ज्ञानं जायते तदा च इष्टानिष्टानां वस्तूनां परिहारेण तत्र वस्तुषु यत् तुल्यताभानं जायते तदेव समतायोगः ।

एषः समतायोगः यदा सिद्धः भवति तदा ऋद्धिसिद्धिलब्ध्यादीनाम् उपयोगे विरक्तिः जायते, आत्मनः मूलभूतानां ज्ञानदर्शनादिगुणानाम् आवरकाणि यानि सूक्ष्मकर्माणि तेषां क्षयः भवति, चित्ते प्रवर्तमानायाः इच्छायाः परम्परायाः विच्छेदः भवति । एतानि फलानि सन्ति समतायोगस्य सिद्धेः ।

अविद्याकल्पितेषूच्चै-रिष्टानिष्टेषु वस्तुषु ।
संज्ञानात् तद्व्युदासेन, समता समतोच्यते ॥३६४॥

ऋद्ध्यपवर्तनं चैव, सूक्ष्मकर्मक्षयस्तथा ।
अपेक्षातन्तुविच्छेदः, फलमस्याः प्रचक्षते ॥३६५॥

( ५ ) **वृत्तिसंक्षययोगः** – मूलभूतरीत्या–निश्चयनयदृष्ट्या तु आत्मा विकल्पादित-रङ्गैः मुक्तः अस्ति । एवं सत्यपि तादृशानां मनोद्रव्याणां संयोगेन विकल्पवृत्तिः शरीरादियोगेन च परिस्पन्दवृत्तिः दृश्यते । एतासां विकल्पवृत्तीनां केवलज्ञानप्राप्तिकाले तथा परिस्पन्दवृत्तीनां च अयोगिकेवल्यवस्थायां पुनः यथा न स्युः तथा यः निरोधः भवति सः वृत्तिसंक्षययोगः इति उच्यते ।

अनेन च वृत्तिसंक्षययोगेन कैवल्यप्राप्तिः जायते, शैलेश्यवस्था च प्राप्यते । अत्र शीलं नाम मनोवाक्कायानां सर्वयोगानां संवरः निरोधः वा, तस्य यः स्वामी सः शीलेशः, तस्य च या अवस्था सा शैलेश्यवस्था – सा अवस्था प्राप्यते, तथा सदैव आनन्ददायिनी च मोक्षप्राप्तिः अपि निराबाधं भवति ।

अन्यत् च शैलेश्यभिधानस्यः समाधेः सकलकर्मणां यः क्षयः भवति सः एव वृत्तिसंक्षययोगः अस्ति । सः च योगेषु नृपतितुल्यः गण्यते ।

अन्यसंयोगवृत्तीनां, यो निरोधस्तथा तथा ।
अपुनर्भावरूपेण, स तु तत्संक्षयो मतः ॥३६६॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतोऽपि केवलज्ञानं, शैलेशीसम्परिग्रहः ।
मोक्षप्राप्तिरनाबाधा, सदानन्दविधायिनी ॥३६७॥

शैलेशीसंज्ञिताच्चेह, समाधिरुपजायते ।
कृत्स्नकर्मक्षयः सोऽयं, गीयते वृत्तिसंक्षयः ॥४९५॥

**वृत्तिसंक्षययोगस्य विशेषवर्णनम् -**

भावना-ध्यान-समतारूपाणां योगत्रयाणाम् अभ्यासेन वृत्तिसंक्षययोगः प्राप्यते । आत्मनि कर्मसंयोगस्य या योग्यता विद्यते तस्याः व्यवच्छेदः अस्ति वृत्तिसंक्षयस्य अर्थः । आत्मनि वर्तमानाः याः कर्मसंयोगजन्याः स्थूलाः सूक्ष्माः च चेष्टाः ताः वृत्तयः इति उच्यन्ते । तासां मूलम् अस्ति एषा योग्यता । एषा योग्यता एव भवमाता अस्ति । अन्यसंयोगाः अपि अतः कारणात् एव उत्पद्यन्ते ।

योग्यतायाः अभावे अपि यदि अन्यसंयोगः स्वीक्रियते तर्हि तत्र अतिप्रसङ्गः भवति । यतः ये जीवाः मोक्षं प्राप्ताः-सिद्धाः जाताः, ते तादृश्याः योग्यतायाः अभावात् एव न पुनः कर्माणि बध्नन्ति । अतः यदि 'योग्यताभावे अपि अन्यसंयोगः भवति' - इति स्वीक्रियते तर्हि तेषाम् अपि कर्मसंयोगः स्वीकरणीयः भविष्यति । यत् तु न सम्मतम् इष्टं वा कस्य अपि ।

यथा वृक्षस्य स्कन्ध-शाखा-प्रशाखादीनां नाशेन पल्लवफलादीनाम् अपुनर्भावः न भवति किन्तु मूलोच्छेदेन एव भवति तथैव भववृक्षस्य अपि योग्यतारूपस्य मूलस्य उच्छेदेन एव विचित्रवृत्यादिरूपाणां पल्लवादीनाम् अपुनर्भावः भवति । सः एव च उच्छेदः वृत्तिसंक्षययोगः अस्ति ।

भावनादित्रयाभ्यासाद्, वर्णितो वृत्तिसंक्षयः ।
स चाऽऽत्मकर्मसंयोग-योग्यतापगमोऽर्थतः ॥४०५॥

स्थूलसूक्ष्मा यतश्चेष्टा, आत्मनो वृत्तयो मताः ।
अन्यसंयोगजाश्चैता, योग्यता बीजमस्य तु ॥४०६॥

तदभावेऽपि तद्भावो, युक्तो नाऽतिप्रसङ्गतः ।
मुख्यैषा भवमातेति, तदस्या अयमुत्तमः ॥४०७॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पल्लवाद्यपुनर्भावो, न स्कन्धापगमे तरोः ।
स्यान्मूलापगमे यद्वत्, तद्वद् भवतरोरपि ॥४०८॥

मूलं च योग्यता ह्यस्य, विज्ञेयोदितलक्षणा ।
पल्लवा वृत्तयश्चित्रा, हन्त तत्त्वमिदं परम् ॥४०९॥

**अध्यात्मादिषु पञ्चसु अपि योगभेदेषु तात्त्विकातात्त्विकादिभेदानां सङ्घटनम्-**

**तात्त्विकातात्त्विकभेदौ** - अध्यात्मं भावना च इत्येतौ योगौ व्यावहारिकनयम् आश्रित्य तन्नाम कारणे कार्योपचारम् आश्रित्य अपुनर्बन्धकसम्यग्दृष्टिजीवानां **तात्त्विकौ** भवतः किन्तु निश्चयनयदृष्ट्या तु चारित्रवताम् एव एतौ **तात्त्विकौ** भवतः ।

सकृद्बन्धक-द्विर्बन्धकादिजीवानां तु द्वौ अपि एतौ योगौ निश्चयनयेन व्यवहारनयेन चाऽपि **अतात्त्विकौ** एव भवतः, यतः तादृशानां जीवानाम् आत्मपरिणामः न तादृशः निर्मलः वर्तते । अतः वेषग्रहणादिका तस्य चेष्टा अपि केवलं श्रद्धाशून्यक्रियामात्रं भवति ।

ध्यानं समता वृत्तिसंक्षयः च इति योगाः यथोत्तरं शुद्धिम् अपेक्ष्य चारित्रिणाम् एव नियमेन तात्त्विकाः एव भवन्ति, न अन्येषाम् ।

अपुनर्बन्धकस्याऽयं, व्यवहारेण तात्त्विकः ।
अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ॥३६९॥

सकृदावर्तनादीना-मतात्त्विक उदाहृतः ।
प्रत्यपायफलप्राय-स्तथा वेषादिमात्रतः ॥३७०॥

चारित्रिणस्तु विज्ञेयः, शुद्ध्यपेक्षो यथोत्तरम् ।
ध्यानादिरूपो नियमात्, तथा तात्त्विक एव तु ॥३७१॥

**सानुबन्धनिरनुबन्धभेदौ** - उपर्युक्तानां योगानां धारकः जीवः यदि अनपायः-तन्नाम योगार्थं बाधकैः क्लिष्टकर्मभिः रहितः-स्यात् तस्य एते योगाः **सानुबन्धाः** भवन्ति । यः च जीवः योगबाधकक्लिष्टकर्मभिः युक्तः भवति तस्य एते योगाः **निरनुबन्धाः** भवन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपायः नाम पूर्वस्मिन् काले उपार्जितानि नानाविधानि अवश्यभोग्यानि चित्ते च पापवृत्त्युत्पादकानि कर्माणि । तानि एव अपायभूतानि सन्ति ।

अत्र मतान्तरं दर्शयति - मोक्षमार्गे प्रवृत्तानाम् आत्मनां ये कण्टक-ज्वर-मोहतुल्याः विघ्नाः सन्ति ते एव अपायाः - इति ।

यथा स्वेष्टस्थानगमनप्रवृत्तानां केषाञ्चित् जनानां मार्गे कण्टकाः विलगन्ति, केचित् तु ज्वरग्रस्ताः भवन्ति, केचित् च दिग्भ्रान्त्या अन्यस्यां दिशि गच्छन्ति । एवं च इष्टस्थानप्राप्तौ अनुक्रमेण स्तोकस्य बहोः बहुतरस्य च कालस्य विलम्बः भवति । तथैव योगमार्गप्रवृत्तानाम् अपि विचित्रकर्मोदयात् जघन्य-मध्यमो-त्कृष्टस्वरूपाः त्रिप्रकाराः विघ्नाः जायन्ते । एते विघ्नाः एव अपायाः इति उच्यन्ते ।

अस्यैव त्वनपायस्य, सानुबन्धस्तथा स्मृतः ।<br>
यथोदितक्रमेणैव, सापायस्य तथाऽपरः ॥३७२॥

अपायमाहुः कर्मैव, निरपायाः पुरातनम् ।<br>
पापाशयकरं चित्रं, निरुपक्रमसंज्ञकम् ॥३७३॥

कण्टकज्वरमोहैस्तु, समो विघ्नः प्रकीर्तितः ।<br>
मोक्षमार्गप्रवृत्ताना-मत एवाऽपरैरपि ॥३७४॥

**सास्रवानास्रवभेदौ** - अपाययुक्तानां योगिनाम् अनेकभवपरम्परायाः कारणरूपः **सास्रवयोगः** भवति । यतः निरुपक्रमकर्माणि पापाशयकराणि च कर्माणि अवश्यं भोक्तव्यानि भवन्ति । यत्र च प्रवर्तमानः एकः एव भवः अस्ति सः **अनास्रवयोगः** इति उच्यते ।

आस्रवस्य कर्मबन्धहेतुत्वात् सः अपि बन्धः एव । सः च बन्धः साम्परायिकबन्धः इति कथ्यते । साम्परायिकबन्धः नाम कषायनिमित्तैः जायमानः बन्धः । अतः एव च आस्रवस्य साम्परायिकबन्धः इति अर्थः अपि सङ्गतः एव ।

ये च चरमशरीरिणः जीवाः तेषु कषायाणाम् अभावात् अन्येषाम् आस्रवाणाम् अपि अभावः अस्ति । अतः च तेषाम् अनास्रवयोगः भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु कर्मबन्धस्य चत्वारः हेतवः सन्ति – मिथ्यात्वम् अविरतिः कषायाः योगाः च इति । अथ यद्यपि चरमशरीरिणाम् आत्मनां मिथ्यात्वाविरतिकषायरूपाणां त्रयाणां हेतूनां नाशः सञ्जातः एव तथाऽपि योगरूपः चतुर्थः हेतुः तु तेषाम् अपि विद्यते एव, अतः एव च तन्निमित्तकः कर्मबन्धः अपि भवति एव । तर्हि 'तेषाम् अनास्रवयोगः अस्ति' – इति कथं वक्तुं शक्यते ?

सत्यम् । निश्चयनयमतेन तु सर्वथा अयोगिकेवलिनाम् एव अनास्रवयोगः भवति । एवं सत्यपि सयोगिकेवलिनां यः योगः अस्ति सः निश्चययोगस्य कारणम् अस्ति । अतः सः अपि अनास्रवयोगः एव इति न कश्चित् दोषः ।

अस्यैव सास्रवः प्रोक्तो, बहुजन्मान्तरावहः ।
पूर्वव्यावर्णितन्याया-देकजन्मा त्वनास्रवः ॥३७५॥

आस्रवो बन्धहेतुत्वाद्, बन्ध एवेह यन्मतः ।
स साम्परायिको मुख्य-स्तदेषोऽर्थोऽस्य सङ्गतः ॥३७६॥

एवं चरमदेहस्य, सम्परायवियोगतः ।
इत्वरास्रवभावेऽपि, स तथाऽनास्रवो मतः ॥३७७॥

निश्चयेनाऽत्र शब्दार्थः, सर्वत्र व्यवहारतः ।
निश्चयव्यवहारौ च, द्वावप्यभिमतार्थदौ ॥३७८॥

**योगस्य अन्यत् स्वरूपम्** –

त्रिधा शुद्धमनुष्ठानं, सच्छास्त्रपरतन्त्रता ।
सम्यक्प्रत्ययवृत्तिश्च, तथाऽत्रैव प्रचक्षते ॥२१०॥

त्रिभिः प्रकारैः शुद्धम् अनुष्ठानम्, सच्छास्त्रपारतन्त्र्यम्, सम्यक्प्रत्ययवृत्तिः च इति त्रिप्रकारकः अपि योगः भवति । तत्र–

**(१) त्रिधा शुद्धम् अनुष्ठनम्** – विषयशुद्धम् अनुष्ठानम्, स्वरूपशुद्धम् अनुष्ठानम्, अनुबन्धशुद्धम् अनुष्ठानं च इति त्रिभिः प्रकारैः शुद्धम् अनुष्ठानं वर्ण्यते । एते त्रयः अपि प्रकाराः उत्तरोत्तरम् अन्यस्मात् अन्यस्मात् प्राधान्येन वर्तन्ते । तन्नाम विषयशुद्धानुष्ठानात्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरूपशुद्धानुष्ठानं श्रेष्ठं प्रधानं वा, स्वरूपशुद्धानुष्ठानात् च अनुबन्धशुद्धानुष्ठानं श्रेष्ठं प्रधानं वा । तत्र-

'अनेन अनुष्ठानेन मम मुक्तिः भवतु' - इत्येवंरूपेण अभिलाषेण मोक्षं लक्षीकृत्य या पतन-शस्त्रपाटन-गृध्रपृष्ठार्पणादिका स्वघातोपायस्वरूपा क्रिया क्रियते सा **विषयशुद्धानुष्ठानम्** । विषयः नाम लक्ष्यम्, तत् यत्र शुद्धं तत् विषयशुद्धम् अनुष्ठानम्। अत्र पतनादिरूपेण स्वघातादिक्रिया अपि मुक्तेः अभिलाषेण एव क्रियते अतः सा अपि विषयशुद्धानुष्ठानम् इति उच्यते । एतत् अनुष्ठानं न स्वरूपतः शुद्धम्, यतः तत्र आत्मघातस्य प्रवृत्तित्वात् तत् पापस्वरूपम् अनुष्ठानम् अस्ति ।

लोकव्यवहारम् आश्रित्य यत् यमनियमादीनां पालनं क्रियते तत् **स्वरूपशुद्धम् अनुष्ठानं** भवति । लोकाचारात् एव क्रियमाणत्वात् सम्यग्ज्ञानस्य सम्यक्श्रद्धानस्य च अभावात् एतत् यमनियमादीनां पालनं न शास्त्रानुसारि भवति ।

एतत् एव उपर्युक्तं यमनियमादीनां पालनं यदा तत्त्वसंवेदनेन-जीवादितत्त्वानां सम्यग्ज्ञानेन, अत्यन्तम् औत्सुक्यरहितं, प्रशान्तवृत्त्या च भवति तदा तदेव **अनुबन्धशुद्धानुष्ठानम्** इति उच्यते ।

विषयात्मानुबन्धैस्तु, त्रिधा शुद्धमुदाहृतम् ।
अनुष्ठानं प्रधानत्वं, ज्ञेयमस्य यथोत्तरम् ॥२११॥

आद्यं यदेव मुक्त्यर्थं, क्रियते पतनाद्यपि ।
तदेव मुक्त्युपादेय-लेशभावाच्छुभं मतम् ॥२१२॥

द्वितीयं तु यमाद्येव, लोकदृष्ट्या व्यवस्थितम् ।
न यथाशास्त्रमेवेह, सम्यग्ज्ञानाद्ययोगतः ॥२१३॥

तृतीयमप्यदः किन्तु, तत्त्वसंवेदनानुगम् ।
प्रशान्तवृत्त्या सर्वत्र, दृढमौत्सुक्यवर्जितम् ॥२१४॥

**त्रयाणाम् अनुष्ठानानां फलम्-**

(अ) केवलेन विषयशुद्धानुष्ठानेन मोक्षबाधकानां दोषाणां नाशः न भवति एव।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः तत्र अज्ञानस्य बाहुल्यं वर्तते । आत्मघातादिकं तु अज्ञानतायाः एव लक्षणम् अस्ति। एवं सत्यपि अनेन विषयशुद्धानुष्ठानेन मोक्षबाधकदोषाणां विगमः यत्र भवेत् तादृशं जातिकुलादिसहितं जन्म तत्कर्तारः प्राप्नुवन्ति-इति केषाञ्चित् शास्त्रकाराणां मतम् अस्ति ।

मोक्षप्राप्तेः इच्छा अपि प्रशंसनीया अस्ति । यतः तादृशी इच्छा अपि मोहनाश-कर्त्री भवति । अतः एव मुक्तिः तु सर्वकल्याणरूपा अस्ति । एतत् अनुष्ठानं तु पापस्वरूपत्वात् तत्र अत्यन्तं वैसदृश्यं वर्तते । अतः च अत्यन्तं पापस्वरूपम् एतत् अनुष्ठानं सर्वथा दोषरहितायाः मुक्तेः कारणं न भवति । ततः च दोषविगमः न भवति।

आद्यान्न दोषविगम-स्तमोबाहुल्ययोगतः ।
तद्योग्यजन्मसन्धान-मत एके प्रचक्षते ॥२१५॥
मुक्ताविच्छाऽपि यच्छ्लाघ्या, तमःक्षयकरी मता ।
तस्याः समन्तभद्रत्या-दनिदर्शनमित्यदः ॥२१६॥

(ब) द्वितीयेन स्वरूपशुद्धेन अनुष्ठानेन तु दोषाणां ह्रासः यद्यपि भवति तथाऽपि न सः सानुबन्धः भवति । अर्थात् विनष्टानां दोषाणां पुनः उद्भवनं यथा न स्यात् तथा दोषह्रासः न भवति । यथा भस्मसात्कृतात् मण्डूकचूर्णात् मण्डूकानाम् उत्पत्तिः न भवति किन्तु केवलात् चूर्णात् तु निमित्तसंयोगे सति उत्पत्तिः भवति एव, तथैव अनेन स्वरूपशुद्धानुष्ठानेन यः दोषक्षयः भवति सः अदग्धमण्डूकचूर्णतुल्यः भवति; अतः एव च निमित्तसंयोगे पुनरपि दोषाः प्रादुर्भवन्ति । निश्चयेन अत्र गुरुलाघवादिचिन्ता न विद्यते। अर्थात् केन गुणेन अधिकलाभः जायते केन च अल्पलाभः जायते, केन दोषेण अधिकहानिः केन च अल्पहानिः भवति - इत्यादिका चिन्ता-विचारणा एव अत्र अनुष्ठाने न विद्यते । तथाविधविवेकाभावात् च कायिकी चेष्टा एव भवति । अतः च आत्यन्तिकः दोषविगमः न भवति । उक्तं च -

[1]"कायकिरियाए दोसा, खविया मण्डुक्कचुण्णतुल्लत्ति ।
सव्वायणए ते पुण, नेया तच्छारसारिच्छा ॥" इति

१. कायक्रियया दोषाः क्षपिता मण्डूकचूर्णतुल्या इति ।
सर्वापनये ते पुन-र्ज्ञेयाः तत्क्षारसदृशाः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयाद् दोषविगमो, न त्वेकान्तानुबन्धनात् ।
गुरुलाघवचिन्तादि, न यत्तत्र नियोगतः ॥२१७॥

(क) तृतीयेन अनुबन्धशुद्धेन अनुष्ठानेन तु निश्चयतः सानुबन्धः दोषविगमः भवति । अन्ये अपि तीर्थान्तरीयाः एवं सानुबन्धदोषानाशं देवगृहादीनां दृढमूलतुल्यं वर्णयन्ति। यथा प्रथमं यदि गृहस्य मूलं दृढं कृतं स्यात् तर्हि तदुपरि रचितं भवनादिकं न नश्यति किन्तु दीर्घकालं यावत् सुरक्षितं स्थिरं च तिष्ठति तथैव च तत्त्वसंवेदनेन युक्तम् अनुष्ठानम् अपि उत्तरोत्तरं दोषनाशाय भवति ।

एतत् अनुष्ठानं गुरुलाघवादिचिन्तया युक्तं भवति । अतः एव च उदारफलदायकं सम्पद्यते । गुरुलाघवादिचिन्तया क्रियमाणा सर्वा अपि प्रवृत्तिः सर्वत्र महोदयाय एव भवति ।

तृतीयाद् दोषविगमः सानुबन्धो नियोगतः ।
गृहाद्यभूमिकापात-तुल्यः कैश्चिदुदाहृतः ॥२१९॥

एतद् व्युदग्रफलदं, गुरुलाघवचिन्तया ।
अतः प्रवृत्तिः सर्वैव, सदैव हि महोदया ॥२२०॥

(२) **सच्छास्त्रपारतन्त्र्यम्** - (अत्यन्तं सरलया शैल्या तथाऽपि दृढतया अत्र शास्त्रस्य महिमा तत्पारतन्त्र्यं च वर्णिते स्तः ।) परलोकस्य साधनायै तु शास्त्रम् एव एकम् आलम्बनम् । स्वमतिकल्पनया लोकहेर्या वा कृता क्रिया न कदापि हिताय भवति । पापरोगनाशकम् औषधम् अपि शास्त्रम् एव अस्ति । अज्ञानरूपस्य अन्धत्वस्य निवारकं चक्षुरपि शास्त्रम् एव । शास्त्रेणैव च सर्वार्थसिद्धिः भवति । अतः एव च शास्त्रे यत्नः अवश्यं विधेयः, यतः मोहस्य अन्धतमसं निवारयितुं शास्त्रम् एव आलोकः अस्ति। शास्त्रं प्रति आदरेण एव च धर्मक्रियाः अपि यथार्थफलदायिन्यः भवन्ति । यतः यस्य शास्त्रे आदरः अस्ति तादृशः श्राद्धः जनः अहङ्कारहितः भवति, गुणरागी भवति, तथा तस्य हृदये पूज्येषु बहुमानं प्रवर्तते । ततः च तस्य धर्मक्रिया अपि प्रकृष्टा गण्यते। यस्य च शास्त्रे अनादरः अस्ति तस्मिन् जने श्रद्धादयः गुणाः प्रायः न भवन्ति, कदाचित् स्युः अपि ते गुणाः तर्हि ग्रहाविष्टजनस्य उन्मादैः तुल्याः भवन्ति, ये च न प्रशंसास्पदाः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति । अतः अन्तःकरणस्य शुद्ध्यर्थं शास्त्रजलस्य आसेवनम् अवश्यं कर्तव्यम् । एषा शास्त्रभक्तिः एव 'मुक्तेः दूती' इति उच्यते ।

परलोकविधौ शास्त्रात्, प्रायो नाऽन्यदपेक्षते ।
आसन्नभव्यो मतिमान्, श्रद्धाधनसमन्वितः ॥२२१॥

उपदेशं विनाऽप्यर्थ-कामौ प्रति पटुर्जनः ।
धर्मस्तु न विना शास्त्रा-दिति तत्राऽऽदरो हितः ॥२२२॥

अर्थादाववविधानेऽपि, तदभावः परं नृणाम् ।
धर्मेऽविधानतोऽनर्थः, क्रियोदाहरणात् परः ॥२२३॥

तस्मात् सदैव धर्मार्थी, शास्त्रयत्नः प्रशस्यते ।
लोके मोहन्धकारेऽस्मिन्, शास्त्रालोकः प्रवर्तकः ॥२२४॥

पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।
चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥२२५॥

न यस्य भक्तिरेतस्मिं-स्तस्य धर्मक्रियाऽपि हि ।
अन्धप्रेक्षाक्रियातुल्या, कर्मदोषादसत्फला ॥२२६॥

यः श्राद्धो मन्यते मान्या-नहङ्कारविवर्जितः ।
गुणरागी महाभाग-स्तस्य धर्मक्रिया परा ॥२२७॥

यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।
उन्मत्तगुणतुल्यत्वा-न्न प्रशंसास्पदं सताम् ॥२२८॥

मलिनस्य यथाऽत्यन्तं, जलं वस्त्रस्य शोधनम् ।
अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥२२९॥

शास्त्रे भक्तिर्जगद्वन्द्यै-र्मुक्तेर्दूती परोदिता ।
अत्रैवेयमतो न्याय्या, तत्प्राप्त्यासन्नभावतः ॥२३०॥

( ३ ) **सम्यक्प्रत्ययवृत्तिः** - प्रत्ययः नाम अभिलषितसिद्धेः संसूचकं चिह्नम्। तादृशः प्रत्ययः त्रिविधः भवति - आत्मप्रत्ययः, गुरुप्रत्ययः, लिङ्गप्रत्ययः च इति ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

सदनुष्ठानम् आरम्भकः पुरुषः तदनुष्ठानस्य अभिलाषी स्यात् इति **आत्मप्रत्ययः**, गुरुः अपि तस्मै तथाविधम् एव उपदेशं दद्यात् इति **गुरुप्रत्ययः**, तथा अनुष्ठानस्य आरम्भकाले मङ्गलवाद्य-शङ्खादीनां ध्वन्यादीनि मङ्गलानि रचितानि स्युः इति **लिङ्गप्रत्ययः**। एतत् सर्वम् अपि सहजम् एव स्यात्। एतेषां प्रत्ययानां सद्भावे सम्पूर्णसिद्धिः प्राप्यते। अर्थात् एषः त्रिविधः प्रत्ययः तु सम्पूर्णसिद्धेः साधनम् अस्ति।

या सिद्धिः अन्यसिद्धेः अवन्ध्यबीजरूपा भवति सा एव ऐकान्तिकी सिद्धिः इति उच्यते। या च सिद्धिः अन्यस्याः सिद्धेः कारणं न भवति सा तु पातशक्तियुक्तत्वात् अवश्यं पतति। अतः च पातशक्तियुक्ता तादृशी सिद्धिः अपि तत्त्वतस्तु पतनम् एव, न सिद्धिः। सिद्ध्यन्तरस्य हेतूनां संयोगात् सिद्धिः पातरहिता ऐकान्तिकी भवति। एतादृशी च ऐकान्तिकी सिद्धिः तु नियमेन आत्मादिप्रत्यययुक्ता भवति। यतः एते प्रत्ययाः एव अन्यसिद्धीनाम् अवन्ध्यकारणरूपाः सन्ति। अतः एव च योगमार्गे एतादृश्याः एकान्तिक्याः सिद्धेः अभिलाषुकैः आत्मादिप्रत्ययेषु तत्परैः भवितव्यम्। यत् वस्तु येन उपायेन साध्यं स्यात् तत् अन्यैः उपायैः हठात् अपि सिद्धं न भवति। यथा घटस्य उपादानकारणेन पटस्य उत्पत्तिः न भवति तथा आत्मादिप्रत्ययरहितया प्रवृत्त्या योगे ऐकान्तिकी सिद्धिः न भवति।

अन्ये योगिनः अपि एतान् आत्मादिप्रत्ययान् सिद्धिदूतान् सिद्धिगतिप्राप्त्यर्थं च हस्तावलम्बनानि इव वर्णयन्ति। अतः चैव सानुबन्धयोगारम्भकः जनः आत्मादिप्रत्ययं निश्चयेन अपेक्षते एव। अर्थात् आत्मादिप्रत्ययम् अवलम्बते एव। अन्ये ये तत्त्वज्ञानरहिततया केवलं कर्मवशेन विषयशुद्धे स्वरूपशुद्धे वा अनुष्ठाने प्रवर्तन्ते ते न एतान् आलम्बन्ते।

तथाऽऽत्मगुणलिङ्गानि, प्रत्ययस्त्रिविधो मतः।
सर्वत्र सदनुष्ठाने, योगमार्गे विशेषतः ॥२३१॥

आत्मा तदभिलाषी स्याद्, गुरुराह तदेव तु।
तल्लिङ्गोपनिपातश्च, सम्पूर्णं सिद्धिसाधनम् ॥२३२॥

सिद्ध्यन्तरस्य सद्बीजं, या सा सिद्धिरिहोच्यते।
ऐकान्तिक्यन्यथा नैव, पातशक्त्यनुवेधतः ॥२३३॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्ध्यन्तरं न सन्धत्ते, या साऽवश्यं पतत्यतः ।
तच्छक्त्याऽप्यनुविद्धैव, पातोऽसौ तत्त्वतो मतः ॥२३४॥

सिद्ध्यन्तराङ्गसंयोगात्, साध्वी चैकान्तिकी भृशम् ।
आत्मादिप्रत्ययोपेता, तदेषा नियमेन तु ॥२३५॥

न ह्युपायान्तरोपेय-मुपायान्तरतोऽपि हि ।
हाठिकानामपि यत-स्तत्प्रत्ययपरो भवेत् ॥२३६॥

पठितः सिद्धिदूतोऽयं, प्रत्ययो ह्यत एव हि ।
सिद्धिहस्तावलम्बश्च, तथाऽन्यैर्मुख्ययोगिभिः ॥२३७॥

अपेक्षते ध्रुवं ह्येनं, सद्योगारम्भकस्तु यः ।
नाऽन्यः प्रवर्तमानोऽपि, तत्र दैवनियोगतः ॥२३८॥

**योगस्य उपायाः** -

किमपि कार्यं कर्तुं तस्य उपायाः भवन्ति । तान् उपायान् आश्रित्य एव कृतं कार्यं सिद्धं भवति । एवमेव च योगमार्गस्य कृते अपि उपायाः सन्ति । तैः एव उपायैः योगस्य सिद्धिः भवति ।

योगप्राप्तेः सामान्यः उपायः अस्ति योग्यता । योग्यतया एव आकृष्य प्रवर्तमानाः अध्यात्मादियोगाः तात्त्विकयोगाः भवन्ति ।

योगस्य विशेषोपायाः षड् सन्ति- उत्साहः, निश्चयः, धैर्यम्, सन्तोषः, तत्त्वदर्शनम्, जनपदत्यागः च । एभिः षड्भिः एव योगिनः योगसिद्धिं लभन्ते । तत्र-प्रथमम् **उत्साहः** आवश्यकः । उत्साहः नाम वीर्योल्लासः । उत्साहं विना प्रारब्धं कार्यं कदाचित् अपूर्णम् तिष्ठति, कदाचित् च अल्पफलम् एव भवति । तदनु च अस्ति निश्चयः । **निश्चयः** नाम सङ्कल्पिते कार्ये सम्पूर्णः एकाग्रभावः । ऐकाग्र्यरहितः उत्साहः दीर्घं न सन्तिष्ठते । ततः च साफल्यम् अपि प्राप्तुं न शक्यते । तृतीयम् अस्ति **धैर्यम्** । आपत्तिषु अपि प्रतिज्ञातः अविचलनं नाम धैर्यम् । श्रेयस्करेषु कार्येषु विघ्नप्राचुर्यं भवति एव 'श्रेयांसि बहुविघ्नानि' इति न्यायात् । एवं च विघ्ने सत्यपि ऐकाग्र्यभङ्गः न स्यात् तदेव वास्तवं धैर्यम् । एतादृशा धैर्येण विना उत्साहः निश्चयः च पङ्गू गण्येते । चतुर्थः उपायः अस्ति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सन्तोषः** । बाह्यपदार्थानां परिस्थितीनां वा आनुकूल्ये प्रातिकूल्ये च लालसायाः उद्वेगस्य च अभावः नाम सन्तोषः । केवलम् आत्मरमणता एव तत्र विद्यते । सन्तोषाभावे चित्तं सततं विक्षिप्तं वर्तते यत् च एकाग्रतायां बाधकम् अस्ति । सन्तोषात् अनु **तत्त्वदर्शनम्** अस्ति । 'योगः एव परमार्थः' इति समालोचनं नाम तत्त्वदर्शनम् । परमार्थबुद्ध्या यावत् योगनिश्चयः न भवति, न तावत् उत्साहादि जायते । ततः च योगप्रवृत्तिः अपि अन्ततोगत्वा कायिकी चेष्टा वा क्लेशरूपा वा सम्पद्यते । अथ अन्तिमः उपायः अस्ति **जनपदत्यागः** तन्नाम सांसारिकस्य लौकिकस्य च व्यवहारस्य त्यागः, यतः योगः तु आत्मिकव्यापाररूपः अस्ति । आत्मिकव्यवहारे प्रवृत्तेन आत्मना लौकिकव्यवहारात् दूरेण भवितव्यम् । यतः लोकव्यवहारः तु आत्मिकव्यवहारे बाधकः अस्ति । सातत्यं विना योगः सिद्धः न भवति । लोकव्यवहारे च प्रवृत्तानां तु सातत्यं न सम्भवति । एवं च योगप्रवृत्तिः अपि निष्फला भवति । अतः च जनपदत्यागः कर्तव्यः एव । एभिः षड्भिः उपायैः योगसिद्धिः अवश्यं भवति ।

उपायोपगमे चाऽस्या, एतदाक्षिप्त एव हि ।
तत्त्वतोऽधिकृतो योग, उत्साहादिस्तथाऽस्य तु ॥४१०॥

उत्साहान्निश्चयाद् धैर्यात्, सन्तोषात् तत्त्वदर्शनात् ।
मुनेर्जनपदत्यागात्, षड्भिर्योगः प्रसिद्ध्यति ॥४११॥

**योगनिश्चयस्य उपायाः –**

प्राप्तः योगः भावयोगः अस्ति न वा इत्यस्य निर्णयार्थं त्रीणि साधनानि सन्ति– आगमः अनुमानं ध्यानाभ्यासः च इति । **आगमः** नाम योगं ज्ञापकानि शास्त्राणि । **अनुमानं** नाम योगस्य यथार्थरूपेण सङ्घटनार्थं तर्कवितर्कादि चिन्तनम् । **ध्यानाभ्यासः** नाम पुनः पुनः तस्य अभ्यासः ।

आगमेन भावयोगस्य निर्णयः श्रद्धया भवति । श्रद्धया जायमानः निर्णय यावत् न बुद्धिगम्यः भवति तावत् योगस्य सम्यग्बोधः न जायते । अतः च अनुमाने बुद्ध्यनुसन्धानेन सद्बोधः जागृतः भवति । एतादृशि बोधे जाते सति तस्य स्वानुभूत्यर्थं पुनः पुनः परिशीलनम् आवश्यकम् । तत् च ध्यानाभ्यासेन भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आत्मा अस्ति । आत्मनः भिन्नं कर्म अपि अस्ति । आत्मनः कर्मणां च वह्न्यय:पिण्डसदृशः सम्बन्धः अपि अस्ति । तादृश सम्बन्धः अपि सहेतुकः एव अस्ति, न निर्हेतुकः । अनेन सम्बन्धेन शुभाशुभं फलम् अपि भवति । एषां कर्मणाम् आत्मना सह वियोगः अपि भवति एव । एषः वियोगः अपि हेतुयोगेन एव भवति न स्वतः । एतत् सर्वम् अपि आत्मनः कर्मणां च तथास्वभावत्वात् एव सङ्घटते, न अन्यथा । यदि तथास्वभावः न स्वीक्रियते तर्हि संयोग-वियोग-शुभाशुभफलादिपरिणामाः न उत्पद्यन्ते । एतादृक्परिणामाभावे च पुरुषार्थः अपि सफलः न स्यात् । अतः एव तथास्वभावस्य स्वीकारे एव योगमार्गादिषु कृतः पुरुषार्थः सफल भवति । अन्यथा पुरुषार्थः न्यायसङ्गतिम् अगच्छन्, भवन् अपि प्रशस्तः न गण्यते । यथा, मुद्गकङ्कटुकेषु सिद्धेः स्वभावाभावः अस्ति, एवं सन् अपि यः तत्र पुरुषार्थं करोति तस्य तादृशः पुरुषार्थः प्रशस्यः अपि न भवति, आदरणीयः अपि न भवति । तथैव यदि आत्मादीनां तादृशः स्वभावः न स्यात् तर्हि तस्य मुक्त्यर्थं योगमार्गेण कृतः पुरुषार्थः अपि अज्ञानजन्यत्वात् निष्फलत्वात् च प्रशस्यः न भवति । अतः च एतादृशस्वभावस्वीकारे एव सर्वं समञ्जसं भवति ।" – एतेन एतादृशेन च सतर्कचिन्तनेन परिशीलनेन च योगमार्गस्य सम्यग्बोधः भवति । स्वयं च यत् आचरति तत् भावयोगः अस्ति न वा इत्यस्य निश्चयः अपि भवति ।

आगमेनाऽनुमानेन, ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां, लभते योगमुत्तमम् ॥४१२॥

आत्मा कर्माणि तद्योगः, सहेतुरखिलस्तथा ।
फलं द्विधा वियोगश्च, सर्वं तत्स्वभावतः ॥४१३॥

अस्मिन् पुरुषकारोऽपि, सत्येव सफलो भवेत् ।
अन्यथा न्यायवैगुण्यात्, भवन्नपि न शस्यते ॥४१४॥

**सर्वयोगानां समन्वयः** –

एतान् एव अध्यात्मादियोगान् अन्ये दर्शनकाराः सम्प्रज्ञातसमाधित्वेन असम्प्रज्ञात-समाधित्वेन च अभिदधति ।

सम्प्रज्ञातः नाम सम्यक्तया प्रकर्षेण च रूपेण वृत्त्यर्थस्य ज्ञानम् । सम्यङ् नाम


Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथावत्-यत् यादृशम् अस्ति तादृशम्, प्रकर्ष: तु सवितर्कनिश्चयरूप: । अत्र वितर्क: नाम श्रुतं शास्त्रं वा, तेन सहित: सवितर्क: । तन्नाम शास्त्रानुसारेण यस्य स्वरूपस्य निश्चय: जात: तादृशस्य वृत्त्यर्थस्य ज्ञानं सम्प्रज्ञात: उच्यते । वृत्ति: नाम नरनारकादिपर्याया:, अर्थ: नाम द्वीप-समुद्र-पर्वतादिपदार्था:, तेषां ज्ञानं वृत्त्यर्थज्ञानम् । एतादृशं ज्ञानम् अध्यात्मादिषु चतुर्षु अपि योगेषु भवति । अत: ते सम्प्रज्ञातसमाधित्वेन वक्तुं शक्यते ।

**पातञ्जलयोगदर्शने** अपि सम्प्रज्ञातसमाधि: एवंरूप: वर्णित: अस्ति-"वितर्क-विचारा-नन्दास्मितानुगमात् सम्प्रज्ञात: (१/१७)" - आ स्थूलपदार्थेभ्य: सूक्ष्म-सूक्ष्मतरपदार्थविषयकं यत् अनुगतचिन्तनं स वितर्कादिचतुर्भेद: सम्प्रज्ञात: समाधि: इति उच्यते" इति ।

कैवल्यप्राप्तौ कारणभूतस्य शुक्लध्यानस्य प्रथमौ द्वौ भेदौ अपि सम्प्रज्ञात-समाधिस्वरूपौ एव स्त: । यत: तत्र अपि वृत्त्यर्थस्य सम्यग्ज्ञानं भवति इति महोपाध्यायश्रीयशोविजयमहाराज: पातञ्जलयोगसूत्रस्य - १/१७-१८ इति सूत्रद्वयस्य-टीकायां कथयति - "तत्र पृथक्त्ववितर्कसविचारैकत्ववितर्काविचाराख्यशुक्लध्यानभेदद्वये सम्प्रज्ञात: समाधि:, वृत्त्यर्थानां सम्यग्ज्ञानात्" इति ।

अनेन समाधिना समाहित: सन् आत्मा अजन्मत्वस्य कारणरूपं जन्म प्राप्नोति। शीघ्रं च केवलज्ञानप्राप्ते: पूर्वाम् आत्मन: वर्धमानचित्तनिरोधावस्थास्वरूपां च क्षपकश्रेणिम् आरोहति । तदनु च केवलज्ञानम् अपि प्राप्नोति । एनां कैवल्यस्वरूपाम् अवस्थाम् एव अन्ये दर्शनकारा: असम्प्रज्ञातसमाधित्वेन वर्णयन्ति । अस्मिन् च आत्मा पूर्णतया समाधिस्वरूप: भवति । अत: च वृत्त्यर्थानां चिन्तनस्य अपि अभाव: भवति । तत: एव च सूक्ष्मम् अपि मानसिकं विज्ञानं तत्र न विद्यते । एष: एव च वृत्तिसंक्षय: योगभेद: अस्ति ।

अत्र द्विधा असम्प्रज्ञात: योग: भवति । एक: सयोगिकेवलिकालभावी अन्य: च अयोगिकेवलिकालभावी । यदा विकल्पज्ञानरूपाया: मनोवृत्ते: तथा ज्ञानावरणीयादीनाम् उदयरूपस्य तस्या: बीजस्य सर्वथा निरोधात् केवलज्ञानप्राप्ति: भवति तदा प्रथम: असम्प्रज्ञात: समाधि: भवति । तत्काले च शरीरस्य सद्भावात् परिस्पन्दरूपा वृत्ति:



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्यते । यदा च सर्वासाम् अपि वृत्तीनां तद्बीजरूपाणां च औदारिकादिशरीराणां सर्वथा अत्यन्तं च उच्छेदः भवति तदा द्वितीयः असम्प्रज्ञातः समाधिः भवति ।

अत्र तात्पर्यं तु एतत् यत् भिन्नभिन्नदर्शनकाराणां शास्त्रेषु नामभेदैः अनेके समाधयः वर्णिताः सन्ति । यथा- धर्ममेघः, अमृतात्मा, भवशत्रुः, शिवोदयः, सत्त्वानन्दः- इत्यादयः । किन्तु एतेषां सर्वेषाम् अपि अध्यात्मादियोगेषु समावेशः भवितुं शक्यते । यतः योगशब्दस्य अर्थः तु सर्वत्र सङ्गतिम् अङ्गति । योगस्य च अनेकाः अवस्थाः सन्ति । अतः तत्तदवस्थाम् अपेक्ष्य तस्य तस्य योगस्य अध्यात्मादियोगेषु अन्तर्भावः भवति एव ।

समाधिरेष एवाऽन्यैः, सम्प्रज्ञातोऽभिधीयते ।
सम्यक्प्रकर्षरूपेण, वृत्त्यर्थज्ञानतस्तथा ॥४१९॥

एवमासाद्य चरमं, जन्माऽजन्मत्वकारणम् ।
श्रेणिमाप्य ततः क्षिप्रं, केवलं लभते क्रमात् ॥४२०॥

असम्प्रज्ञात एषोऽपि, समाधिर्गीयते परैः ।
निरुद्धाशेषवृत्त्यादि-तत्स्वरुपानुवेधतः ॥४२१॥

धर्ममेघोऽमृतात्मा च, भवशत्रुशिवोदयः ।
सत्त्वानन्दः परश्चेति, योज्योऽत्रैवाऽर्थयोगतः ॥४२२॥

मुक्तिः तु योगस्य एव अन्त्यावस्थारूपा अस्ति । प्रथमं समाधियोगः सिद्धः भवति, तदनु च मुक्तियोगः । तथा तथा कर्मक्षयार्थं यः योगः प्रवर्तते सः समाधिः इति उच्यते । यः च निष्ठाप्राप्तः योगः अस्ति अर्थात् कर्मक्षयस्य समाप्तिं प्राप्तः यः योगः अस्ति तम् एव योगमार्गज्ञाः मोक्षम् इति कथयन्ति । यतः यदा समाधिः पूर्णतां प्राप्नोति तदा तेन समाधिना आत्मनः कर्मणः च परस्परसंयोगस्य योग्यतायाः अभावः भवति। योग्यतायाः अभावात् च पुनः तेषां संयोगः न भवति एव । ततः च संसारः अपि न अवशिष्यते। अर्थात् संसाराभावः भवति ।

तथा तथा क्रियाविष्टः, समाधिरभिधीयते ।
निष्ठाप्राप्तस्तु योगज्ञै-र्मुक्तिरेष उदाहृतः ॥।४९६॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयोगयोग्यताभावो, यदिहाऽऽत्मतदन्ययोः ।
कृतो न जातु संयोगो, भूयो नैवं भवस्ततः ॥४९७॥

**योगफलम्** -

सम्यग्योगः उभयलोकहिताय भवति । अत्र दर्शितानि ऐहलौकिकानि फलानि तु योगमार्गप्रवृत्तानाम् आत्मनां कृते स्वकीयः मार्गः समीचीनः न वा इति निश्चयार्थम् अत्यन्तम् उपयोगीनि सन्ति ।

योगपथपथिकानां योगसाधनया के के लाभाः भवन्ति इत्यत्र दर्शयन्ति । "१. **स्थिरता** - प्रतिज्ञातस्य निर्वाहे स्थैर्यम् । २. **धैर्यम्** - आपत्तौ अपि अविचलित-स्वभावः । ३. **श्रद्धा** - सत्यमार्गं प्रति दृढा रुचिः । ४. **मैत्री** - सर्वजीवेषु हितचिन्तनरूपः मित्रभावः । ५. **जनप्रियत्वम्** - शिष्टलोकानां स्नेहः । ६. **प्रातिभतत्त्वभासनम्** - स्वकीयया साहजिक्या प्रतिभया जीवादितत्त्वानाम् अवलोकनम् । ७. **विनिवृत्ताग्रहत्वम्** - अनुचिताभिनिवेशस्य अभावः । ८. **द्वन्द्वसहिष्णुता** - कर्मोदयेन प्राप्तानाम् इष्टानिष्टविषयाणां वियोगसंयोगरूपाणां द्वन्द्वानां सम्यक् सहनम् । ९. **द्वन्द्वविनाशः**- द्वन्द्वानां यानि निमित्तानि तेषां शक्तीनां शुद्धयोगेन नाशः सञ्जाते सति तेषां द्वन्द्वानाम् अभावः । १०. **कालोचितबाह्यलाभः** - समाधेः स्थिरतायां निमित्तभूताः जीवननिर्वाहादयः कालोचिताः लाभाः । ११. **शुभोदया धृतिः** - जीवननिर्वाहिकासु सामग्रीषु सन्तोषः, अधिकप्राप्तेः लालसायाः अभावः च । १२. **शुभोदया क्षमा** - सत्यासत्यस्य श्रवणमात्रेण एव उत्तेजितं भूत्वा आविचार्य एव क्रोधादीनाम् आलम्बनेन आत्मनि जायमानायाः विक्रियायाः रोधनम् । १३. **सदाचारः** - सर्वेषाम् उपकारकारिणी प्रियवचनरूपा अकृत्रिमोचितस्नेहादिरूपा सज्जनानां चेष्टा । १४. **योगवृद्धिः** - मुक्तेः बीजभूतानां सम्यग्दर्शनादीनाम् उत्कर्षः । १५. **आदेयता** - अन्यैः आदरणीयानां वचनानां स्वामित्वम् । १६. **गुरुत्वम्** - गौरवम् । १७. **अनुत्तरशमसौख्यम्** - कषायाणां मन्दत्वे सति उद्भूतं प्रशमसुखम् । एतत् च बाह्यपदार्थजन्येभ्यः विषयादिसुखेभ्यः अतिशायि भवति" इति । एतावन्तः ऐहिकलाभाः भवन्ति योगसाधनया ।

योगस्य च मुख्यम् एकान्तिकम् आत्यन्तिकम् अनुत्तरं च फलम् अस्ति परं


Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रह्म इति योगविदः वदन्ति ।

किं चाऽन्यद् योगतः स्थैर्यं, धैर्यं श्रद्धा च जायते ।
मैत्री जनप्रियत्वं च, प्रतिभं तत्त्वभासनम् ॥५२॥

विनिवृत्ताग्रहत्वं च, तथा द्वन्द्वसहिष्णुता ।
तदभावश्च लाभश्च, बाह्यानां कालसङ्गतः ॥५३॥

धृतिः क्षमा सदाचारो, योगवृद्धिः शुभोदया ।
आदेयता गुरुत्वं च, शमसौख्यमनुत्तरम् ॥५४॥

योगस्यैतत्फलं मुख्य-मैकान्तिकमनुत्तरम् ।
आत्यन्तिकं परं ब्रह्म, योगविद्भिरुदाहृतम् ॥५०६॥

अतः एव च विद्वत्ताफलकाङ्क्षिभिः बुद्धिमद्भिः जनैः एषा सद्गोचरादिसंशुद्धिः आलोचनीया । तदनु च एषा यदि योग्या प्रतिभासेत तर्हि स्वीकरणीया अपि । अर्थात् योगमार्गे श्रद्धा अपि कर्तव्या, आचरणम् अपि कर्तव्यम् । यतः सद्योगस्य अभ्यासः एव विद्वत्तायाः फलम् अस्ति, न अन्यत् किम् अपि । योगाभ्यासं विना तु शास्त्राणि अपि संसाररूपाणि एव इति निर्मलमतीनां शास्त्रविदाम् आशयः । यथा सज्ज्ञानरहितानां मूढात्मनां कृते पुत्रपुत्र्यादिसंसारः भवति तथा सद्योगरहितानां विदुषां कृते अपि शास्त्राणि एव संसाररूपाणि सन्ति । अतः एव च पण्डितजनैः योगमार्गेण यतितव्यम् ।

सद्गोचरादिसंशुद्धि-रेषाऽऽलोच्येह धीधनैः ।
साध्वी चेत्प्रतिपत्तव्या, विद्वत्ताफलकाङ्क्षिभिः ॥५०७॥

विद्वत्तायाः फलं नाऽन्यत्, सद्योगाभ्यासतः परम् ।
तथा च शास्त्रसंसार, उक्तो विमलबुद्धिभिः ॥५०८॥

पुत्रदारादिसंसारः, पुंसां सम्मूढचेतसाम् ।
विदुषां शास्त्रसंसारः, सद्योगरहितात्मनाम् ॥५०९॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाध्याय

# नमि-प्रव्रज्या

(नमिराजर्षेः इन्द्रेण सह संवादः)

**मुनिकल्याणकीर्तिविजयः**

पुरा हि शशास मिथिलां नमिः नाम नृपतिः । एकान्तेन धर्मप्रियः प्रजाहितः पराक्रमी महादानी च स आसीत् । अतः सर्वाः प्रजाः तस्मै पूर्णतया स्निह्यति स्म । तथा चौराः अनीतिकारिणः च ततः पूर्णरूपेण बिभ्यति स्म ।

सः एकवारं सायङ्काले गवाक्षे स्थितः सर्वतः विलोकयन् आसीत् । तावता तस्य दृष्टिः व्योम्नि पतिता । तत्रत्यं दृश्यं पश्यन् स स्तब्धः इव मूर्त्तः इव निर्निमेषनयनः बभूव । अहो ! कुतस्त्याः एते आकाराः !! कीदृशाः आकर्षकाः मनोमोहकाः च !! अवर्णनीया वर्णपरम्परा एतेषाम् ! अचिन्त्या च रमणीयता ! चेतोहरा च चारुता ! ननु कः खलु जीमूतकन्दुकैः ईदृशीं क्रीडां करोति ? धन्यवादाः तस्य, धन्यम्मन्यः च अहं येन जीवनसारभूतं दृष्टम् एतत् रामणीयकम् ।

अथ एवं सुषमापीयूषगण्डूषान् आकण्ठं पिबतः तस्य प्रपश्यतः एव अकस्मात् उच्चैः वातः महावातः नभोमण्डले व्याप्तान् तान् अभ्रखण्डान् स्वेन सह सुदूरं नीतवान् । गगनं केवलं निराकारं निरञ्जनं नीरागं च शिष्टं तत्र ।

एतद् दृष्ट्वा स चित्ते चकितः मनसि विस्मतः हृदये च स्तब्धः अभवत् । "अहो खलु अनित्यता पदार्थानां ! तरलता विषयाणां ! क्षणभङ्गुरता भावानां ! अनित्यता सम्पदाम् !! किं एतत्पर्यवसानः एव संसारः ? किं सर्वम् अपि अत्र इन्द्रजालप्रतिच्छायम् ? तर्हि नित्यं किम् ? शाश्वतं किम् ? अनश्वरं किम् ? किञ्चित् तु भवितव्यम् एव । तद् एव खलु प्राप्तव्यं मया !" इत्यादि चिन्तयन् सः वैराग्यभावनाभावितान्तःकरणः उल्लसिताभ्यन्तरविवेकः विषयविनिवृत्तचेताः तदा एव गृहत्यागं निर्णीतवान् । स्वज्येष्ठपुत्रं राज्ये अभिषिच्य च सद्यः एव सपुरजनां सान्तःपुरां सानीकिनीं च मिथिलां नगरीं त्यक्त्वा अभिनिष्क्रान्तः सः एकान्तेन प्रव्रज्याम् अधिष्ठितवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ च प्रव्रजति तस्मिन् नमिनृपतौ तं प्रति सर्वथा समर्पिताः बद्धादराः च प्रजाः अत्यन्तं दुःखिताः अभवन्। सर्वत्र च रोदनाक्रन्दनविलापानां करुणशब्दाः श्रूयन्ते स्म । एतेन सर्वः अपि नगरपरिसरः कोलाहलमयः सञ्जातः इव ।

इतः च, एतस्मिन् अवसरे स्वर्गमध्ये सौधर्मदेवलोकाधिपेन शक्रेण स्वीयदिव्यज्ञानप्रयोगेण ज्ञातम् एतत्-यत्-नमिः राजा प्रव्रज्यायै अभ्युत्थितः - इति । अतः सः तस्य परीक्षार्थं ब्राह्मणवेषं धारयित्वा तत्सम्मुखम् उपस्थितः ।

तदात्वे तयोः द्वयोः मध्ये यः संवादः प्रचलितः सः अतीवरोचकत्वात् अत्र प्रस्तुतः ॥

**इन्द्रः** भोः ! किमर्थम् अद्य मिथिलायाः प्रासादेषु गृहेषु च कोलाहलसङ्कुलाः दारुणाः च आक्रन्दनशब्दाः श्रूयन्ते ?

**नमिः** भोः ! मिथिलायाम् एकः महान् वृक्षः आसीत् । यः बृहत्कायः शीतलच्छायः पत्रपुष्पफलोपेतः अत्यन्तं गुणकारी च आसीत् । तथा तन्निश्रया बहवः पक्षि-सर्प-चिक्रोडादयः प्राणिनः जीवन्तः आसन् । अद्य महावातेन स वृक्षः समूलम् उत्पाट्य विनाशितः । एतेन ते सर्वे अपि जन्तुजाताः अशरणाः निराधाराः च सञ्जाताः । अतः तद्दुःखेन क्रन्दमानानां तेषां करुणशब्दाः एते श्रूयन्ते । किं च, तत्र न किम् अपि चिन्ताकारणम् । यतः प्राप्ते अन्यस्मिन् आश्रये ते सर्वे अपि प्राणिनः शान्ताः सुखिनः च भविष्यन्ति ।

**इन्द्रः** भवतु । किन्तु भगवन् ! मिथिलानगरम् अग्निज्वालाभिः दह्यमानम् अस्ति । महावातेन च ताः ज्वालाः भवतः अन्तःपुरं प्रासादं च ज्वालयन्त्यः सन्ति। तत् सर्वं भवान् जानन् अपि किमर्थम् इह एव तिष्ठति ? तत्र गत्वा अग्नेः विध्यापनादि भवतः कर्तव्यं खलु ?

**नमिः** भोः ! अहं हि सर्वथा अकिञ्चनः अस्मि, ततः च सुखेन वसामि जीवामि च । किञ्च, मिथिलायां दह्यमानायां मम तु किञ्चन अपि न दहति । यतः, यत् मामकीनम् अस्ति तत् तु न कदा अपि दहति, यत् च दहति तत् तु मम नास्ति एव । अथ च, त्यक्तपुत्रकलत्रस्य सर्वथा निर्व्यापारस्य भिक्षोः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मिन् संसारे किञ्चित् प्रियम् अपि न विद्यते, न वा किञ्चित् अप्रियम् अपि विद्यते। तथा, अनगारस्य भिक्षावृत्त्या जीवतः मुनेः भद्रं तु सर्वतः विप्रमुक्तत्वात् एकान्तेन च आत्मानः एव अनुदर्शकत्वात् एव। न तु अन्यथा कथम् अपि।

**इन्द्रः** बाढम्। अथ एका विज्ञप्तिः अस्ति। भवान् हि अस्य नगरस्य राजा अस्ति। यदि भवान् भिक्षुजीवनम् एव यापयितुम् इच्छति तर्हि न का अपि बाधा अस्माकम्। किन्तु प्रथमं नगरस्य प्राकारं सम्यक्तया समारचय्य, द्विषदाक्रमण-सहनाय च समर्थं कारयित्वा, शतघ्न्यादिभिः शस्त्रैः अस्त्रैः च संयोज्य, तथा गोपुराणि अट्टालकानि च कारयित्वा, तत्पश्चात् भिक्षुत्वम् अङ्गीकरोतु। येन भवतः प्रजाजनाः निर्भयतया जीवेयुः।

**नमिः** भोः! एतत् सर्वं तु मया कृतम् एव। शृणु तावत्। श्रद्धा नाम नगरं मया निर्मापितम् अस्ति। तस्य द्वारि तपसः संवरस्य च अर्गलं योजितम्। क्षमाभिधः विशालः प्राकारः तत्परितः कारितः। सः अपि गुप्तित्रयेण[१] दृढः शत्रूणां दुष्प्रध्वंसः च कृतः। तथा जीवपराक्रमं नाम धनुः मया गृहीतम् अस्ति। तत्र ईर्यासमितिः[२] नाम ज्या अस्ति। धृतिनाम्ना बन्धनेन ज्यां धनुषा बद्ध्वा सत्येन सा आकृष्यते तत्र च तपःस्वरूपः बाणः स्थाप्यते। ततः च तेन बाणेन कर्मराज्ञः कञ्चुकं दृढतया भित्त्वा तं च हत्वा अहं विगतसङ्ग्रामः भविष्यामि। भवचारकात् च विमुक्तः भविष्यामि।

[अनुवर्तते]

[आधारः उत्तराध्ययनसूत्रस्य नवमम् अध्ययनम्]

**पुत्रा मे भ्राता मे स्वजना मे गृहकलत्रवर्गो मे।**
**इति कृत-मेमे-शब्दं पशुमिव मृत्युर्जनं हरति।**

**[शीलाङ्काचार्यकृतायाम्-आचाराङ्गवृत्तौ]**

१. मनो-वाक्-काययोगनिवृत्तिरूपं गुप्तित्रयम्।
२. ईर्या-गमनम्। गमने मार्गस्य सम्यक्तया निरीक्षणं दत्तचित्तत्वं च ईर्यासमितिः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# आस्वादः चिन्तनधारा

मुनिरत्नकीर्तिविजयः

"You're not bad, because of what you did,
you're good, although what you did was bad."
(Brock Tully)

व्यवहारे कतिचित् वाक्यानि वारंवारं प्रयुज्यन्ते । यथा - 'मनुष्यमात्रं क्षतेः पात्रम्, 'मनुष्यस्य एव क्षतिः भवति', 'यः कार्यं करोति तस्य एव स्खलनं भवति'- इत्यादीनि । अत्र विडम्बना तु एतत् यत् एतेषाम् एतादृशानां वा वाक्यानां प्रयोगं मनुष्यः स्वदोषाच्छादनाय एव करोति । किन्तु यदा अन्यस्य क्षतिः भवति तदा सः एतानि सर्वाणि अपि विस्मरति । न एतावत् एव अपि तु अन्यं प्रति तिरस्कारं हीनताभावं वा आवहति । स्वस्य क्षतिः यदा भवति तदा सहसा एव तस्य स्मरणं भवति यत् 'अहं मनुष्यः अस्मि अतः क्षतिः जाता' । अन्यथा तु स्वं देवम् इव एव मत्वा सर्वदा विहरति । परन्तु अन्यस्य क्षतिं दृष्ट्वा तस्य एतादृशी मतिः न जायते यत् 'एषोऽपि मनुष्यः एव अतः मम इव तस्य अपि क्षतेः सम्भावना अस्ति एव' । स्वम् इव अपरम् अपि सः देवतुल्यं गणयेत् - एतावती नाऽस्ति अत्र अपेक्षा किन्तु तदा सः तं मनुष्यम् अपि अगणयित्वा यत् व्यवहरति तत् तु विचारणीयम् । ततः एव क्लेशाः सङ्क्लेशाः सन्तापाः तेषां परम्परा च उत्तिष्ठन्ते । 'यत् भूतं तत् किमर्थं भूतम् ?' - इत्यस्य एव चर्चायां विवादे वा मनुष्यस्य मतिः मूढा भवति, किन्तु तादृशं पुनः यथा न स्यात् तदर्थं किं करणीयम् अस्ति- इति विचारः अपि तस्य न स्फुरति । अतः एव च पुनः पुनः तादृशी स्थितिः साक्षात्करणीया भवति ।

एतस्यां स्थितौ मनुष्यस्य स्वभावस्य दोषात् स्वबोधस्य दोषः अधिकः इति वक्तुम् उचितम् । यतः बोधेन स्वभावपरिवर्तनं शक्यम् एव । मनुष्यः यदा स्वस्य विचारान् स्वस्य वचनानि स्वस्य दृष्टिं एव च कदाग्रहेण विलग्नः वर्तते अन्यान् च प्रति आदरेण समानत्वेन औदार्येण च न व्यवहरति तदा यत् जायते तदेव अस्ति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्माकं सर्वेषां 'वर्तमानम्' (वर्तमाना स्थितिः) । सर्वेऽपि तस्य अनुभवं कुर्वन्ति । एषा स्थितिः कस्मैचित् अपि रोचते इति तु न किन्तु सर्वेऽपि प्रतीक्षमाणाः स्थिताः सन्ति यत् 'परः कदा स्वस्मिन् परिवर्तनं कुर्यात्' इति । एतादृश्याः च प्रतीक्षायाः अन्तः न केनाऽपि दृष्टः नाऽपि कल्पितः । स्वस्मिन् परिवर्तनम् एव अत्र उपायः, न अन्यः ।

व्यवहारः संस्कारितां द्योतयति संस्कारिता च शिक्षणम् । यादृशं शिक्षणं तादृशाः संस्काराः, यादृशाः च संस्काराः तादृशः व्यवहारः । अद्यतनी शिक्षणपद्धतिः किम् आर्यपद्धतिः आर्षपद्धतिः वा अस्ति ? - एतत् तु सर्वैः अपि विचारणीयम् । आभासिकीं भौतिकीम् उन्नतिं प्रति आसक्ताः तत्प्राप्तौ एव च प्रयतमानाः वयं अस्माकं संस्कारधनं नाशयामः । अत्र विषये अस्माभिः जागृतैः भवितव्यम् । स्वस्य जागरणम् अनिवार्यं प्रतिभाति । जीवनस्य सर्वोपरित्वं यत् न बोधयेत् सत्संस्कारान् च यत् न जागरयेत् तत् शिक्षणं कीदृशम् ? कथं नाम तत् शिक्षणत्वेन वक्तुं शक्यते ?

उपर्युक्ते- "त्वया यत् आचरितं तेन न त्वम् अयोग्यः; त्वं तु योग्यः एव, केवलं त्वया यत् आचरितं तत् अयोग्यम्" इति - अत्र वाक्ये व्यवहारस्य औदार्यं संस्कारितायाः च आमोदः अनुभूयते । हृदयस्य विशालता दृष्टेः निर्मलता चाऽपि कामम् अनुभूयते । प्रकटरीत्या अस्मिन् वाक्ये कम् अपि उद्दिश्य न किम् अपि उपदिष्टम् अस्ति । एवं सत्यपि पारस्परिकैक्यस्य रहस्यं, मनसः शान्तेः, चित्तस्य प्रसन्नतायाः जीवनस्य उल्लासस्य चाऽपि रहस्यम् अतः वाक्यात् प्रकटत् अनुभूयते । एषः एव आर्यव्यवहारः आर्षव्यवहारः वा । एतादृशे व्यवहारे एव अस्माकं मानवसमाजस्य च उन्नतेः मूलं निहितम् अस्ति । अस्मात् वाक्यात् प्रवहन्तीं संस्कारितां यदि नाम वयम् अङ्गीकुर्याम पारस्परिकव्यवहारे च प्रयुञ्ज्याम तर्हि अनेकाः विडम्बनाः निर्मूलाः स्युः, समाधिः शान्तिः च सहजतया प्राप्ता स्यात् । किन्तु अत्र एक एव प्रश्न अस्ति यत् - 'किं वयं आर्याः स्मः ? अस्माकं हृदये आर्यत्वस्य गौरवं किं विलसति ?'

प्रत्येकं व्यक्तिः सदसत्संस्काराणां पिण्डरूपा अस्ति । व्यक्तेः चारित्र्यनिर्माणं न सामान्यघटना अस्ति । शिक्षणं यथा संस्कारान् उद्बोधयति तथा पारस्परिकः व्यवहारः अपि संस्कारान् स्पृशति । मनुष्यस्य चारित्र्यनिर्माणे शिक्षणतुल्यं दायित्वं व्यवहारः अपि निर्वहति । शिक्षणस्य व्यवहारस्य च उभयोः अपि लक्ष्यम् अस्ति - चारित्र्यनिर्माणम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतल्लक्ष्येण रहितं शिक्षणं तु केवलं विद्यायाः व्यापारः अस्ति । तादृशात् शिक्षणात् वैचारिकं व्यवहारिकं च औन्नत्यम् औदार्यं वाऽपि न प्रकटते । तथैव च लक्ष्यविहीनेन व्यवहारेण अपि पारस्परिकः भ्रातृभावः, जीवने शान्तिः प्रसन्नता च न लभ्यन्ते ।

उपर्युक्तस्य वाक्यस्य प्रत्येकं शब्देभ्यः शिक्षणस्य प्रकाशः व्यवहारस्य च माधुर्यं स्रवत् अनुभूयते । एषः प्रकाशः एतत् माधुर्यं चैव अस्माकम् आर्यसंस्काराणां प्राणतत्त्वम् अस्ति । अस्मासु विद्यमानस्य आर्यत्वस्य सम्यक्परिचयः एताभ्याम् एव भवति । अस्मासु जागृते एते प्रकाशः माधुर्यं च अन्यजनेषु सुप्तं देवत्वं जागरयिष्यति । तत् जागृतं देवत्वम् एव तस्य असत्संस्कारान् मूलतः उन्मूलयिष्यति । एवं च रीत्या व्यक्तौ व्यक्तौ जागृतं देवत्वम् एव क्रमशः परिवारस्य, समाजस्य, राज्यस्य, देशस्य, विश्वस्य च स्थितौ व्यापकम् उन्नतं स्थिरं च परिवर्तनं विधास्यति ।

समाज-राज्य-देशादीनाम् औन्नत्यार्थं बृहतीषु सभासु भाषणानि न आवश्यकानि नाऽपि च तानि उपायरूपाणि सन्ति । तदर्थं तु दृष्टौ नैर्मल्यम् एव आवश्यकम् । दृष्टिः यदि निर्मला भविष्यति तर्हि व्यवहारः तु स्वयमेव निर्मलः स्वस्थः च भविष्यति । तदनु च उन्नतिः शान्तिः प्रसन्नता वा न दुःसाध्या असाध्या वा स्यात् ।

वयम् अस्माकम् अहङ्कारः च सततम् अपरं धिक्कुर्महे तिरस्कुर्महे । व्यक्तिं च हीनं तुच्छम् अयोग्यं मत्वा-गणयित्वा एव व्यवहरामः । किन्तु न अनेन मार्गेण कस्य अपि जीवनम् उज्ज्वालयितुं शक्यम् । एतादृशः व्यवहारः तु परस्य जीवने अन्धकारम् एव प्रतनोति । यदि नाम वयं कस्य अपि जीवनम् उज्ज्वालयितुं न अलम् तर्हि तत् न तावत् शोचनीयम्, किन्तु कस्य अपि जीवने अन्धकारं न प्रसारयेम इति तु पर्याप्तम्। उपर्युक्तात् वाक्यात् एषः एव उपदेशः ध्वन्यते ।

एतत् वाक्यं सतां प्रकृतिं सतां कृतिं च परिचाययति । वयम् अपि एतादृशं ज्ञानस्य प्रकाशं व्यवहारस्य औदार्यं दृष्टेः नैर्मल्यं च प्राप्नुयाम येन सर्वेषां जीवनं सुखमयं शान्तिमयं प्रसन्नतामयं च स्यात् । इति शम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आस्वाद

# साम्प्रतचिन्तनम्

शास्त्री व्रजलालः वि. उपाध्यायः

इह लोके अनर्थबहुले प्रसृत्वरकामनातन्तौ अर्थप्रधाने प्रवर्तमाने विश्वे तावत् चत्वारः प्रभुसत्ताकाः प्रभवः सत्ताधीशाः जागरूकाः सन्ति इति सर्वसुविदितम् एव । अस्तु, के ते इति-

शस्त्रं शास्त्रं धनं राजा, सन्तश्च प्रभव इमे ।
चत्वारो लोकविदिता, मुमुक्षुर्वेत्ति पञ्चमम् ॥

१. **शस्त्रम्**, २. **शास्त्रम्**- पुस्तकस्थं, समृद्धाः ज्ञानकोषाः वा, आर्याणां मौनम् आकलितवती अपूर्वा सम्पद्, ३. **धनम्** - तत्स्वामिनः वा । अथ च ४. **राजा** - राष्ट्ररक्षकः (यस्य अस्माभिः प्रभोः अंशत्वेन (अस्मत्पूर्वजैः) प्रतिष्ठा कृता आसीत्-इति तु अन्यत् एव तत्त्वम्) । इमे चत्वारः समर्थाः स्वेप्सितकार्यकरणे प्रभविष्णवः विदिताः एव । पञ्चमं प्रभुं तु केवलं मुमुक्षुः साधकः अकिञ्चनः एव वेत्ति- जानाति, न अन्यः कश्चन ।

अलौकिकसत्त्वस्वामिनः सन्तः समर्थाः भक्ताः प्रभोः त्रिकालाबाधितसत्ताकस्य अस्तित्वस्वीकारवन्तः सानन्दाः महात्मानः साधुपुरुषाः अचिन्त्यशक्तिधरप्रभुसामर्थ्य-समुदित-निकटस्थ-स्वान्तःस्थ-आन्तरैश्वर्यमण्डितवाचंयमाः प्रभोः विद्यमानरूपं सर्वसत्ता-धीशस्थानम् उररीकृत्य मौनिनः पुण्यभाजः विलसन्तुतराम् । तेषां पुण्यप्रभावेन एव जगत् सुरक्षितं वर्तते । अन्यैः धीधनैः सात्त्विकैः पण्डितंमन्यैः तु यदि सामान्यजनवत् आर्थिकदासत्वं स्वीक्रियते चेत् महती हानिः । इदम् एव दुःखस्थानम् इति । उक्तं च केन अपि-

आचार्यस्य बलं ज्ञान-माज्ञा सिंहासनेशितुः ।
ज्ञानमाज्ञा युगीभूय, कालं सम्परिवर्तयेत् ॥१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यत्वं प्रमाणं चेत्, शास्त्रं समनुधावति ।
आचार्यश्च तदा राजा, मिथो मैत्रीं समाप्नुतः ॥२॥

शस्त्रं सम्परिवर्तेत, न शास्त्रं परिवर्तते ।
शास्त्रं न पुरुषायत्तं, पुरुषाश्रयमेव च ॥३॥

यथा कालो यथा शत्रु-र्यथैव स्वबलं भवेत् ।
तथा निर्मीयते शस्त्रं, न शास्त्रं केनचित् क्वचित् ॥४॥

नीतिर्नूलाऽपि कल्प्येत, रक्षणे शस्त्रशास्त्रयोः ।
न चैकविधः कालः, रक्ष्यं तु द्वितयं नरैः ॥५॥

शस्त्रं संरक्ष्यते दुर्गै-र्बलवद्भिर्भटैरपि ।
मन्त्रज्ञैरपि चाऽमात्यै-स्तथा प्रभुबलेन च ॥६॥

शास्त्रं संरक्ष्यते वर्णै-र्बलवत्पण्डितैरपि ।
मन्त्रज्ञैरपि भूपालै-स्तथाऽऽचार्यबलेन च ॥७॥

नीतेर्धर्मेण सौभाग्यं, नीत्या धर्मस्य तत् तथा ।
अन्योन्यविमुखत्वे तु, विधवाविधुरौ च तौ ॥८॥

अत एव तथा लोके, दृश्यते प्रायशो जनैः ।
विधवाविधुराभ्यां हि, समन्तात् पूरितं जगत् ॥९॥

मङ्गलं राजपुण्येन, ज्ञानमाचार्यपुण्यतः ।
तीव्रे पुण्योदये शुद्धे, पृथ्वीभाग्योदयो भवेत् ॥१०॥ इति अलं विस्तरेण।

जानकी एपार्टमेन्ट, 1st फ्लोर,
लालामेतानी शेरी, जामनगर-३६१००१

**किं एत्तो कट्ठयरं जं मूढो थाणुअंमि आवडिओ ।**
**थाणुस्स तस्स रूसइ न अप्पणो दुप्पओगस्स ॥**
(शीलाङ्काचार्यकृतायाम् आचाराङ्गवृत्तौ)



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# पत्रम्

मुनिधर्मकीर्तिविजयः

नमो नमः श्रीगुरुनेमिसूरये ॥

आत्मीयबन्धो ! चेतन !

धर्मलाभः अस्तु ।

अत्र वयं सर्वे अपि ससातं वर्तामहे । तव अपि एवमेव कामये अहम् । अस्माकं दक्षिणदिशः विहारयात्रा सुखरूपा प्रवर्तते ।

किञ्चित्कालात् वयं दक्षिणप्रदेशे विहरामः । अत्रत्यां धार्मिकीं स्थितिं निरीक्ष्य मनसि ग्लानिः सञ्जाता यत्, "समाजः कां दिशं प्रति गतवान् अस्ति । न तु गुर्जरदेशे, किन्तु सर्वत्र जैनसमाजे जैनेतरसमाजे अपि एतादृशी एव स्थितिः दृष्टिपथम् आयाति"।

अधुना सर्वत्र बाह्यदृष्ट्या धर्मस्य प्रसारः अतीव विस्तृतः, अद्य जनेषु धर्मरुचिः वृद्धिं गता अस्ति । नूतनमन्दिरनिर्माण-प्रतिमास्थापना-भक्तिमहोत्सव-सङ्घयात्रादीनि नैकानि धर्मकृत्यानि बोभूयन्ते । धर्मकार्येषु निराबाधं धनव्ययः अपि विशेषतः भवति । एवं धर्मप्रभावनायाः बहूनि कार्याणि भवन्ति । तथा अपि वस्तुतः वयं सर्वे अपि आत्मोन्नतिविधायकात् निजगुणोत्कर्षकारकात् च धर्मात् च्युताः भवामः । बाह्यधर्मस्य प्राचुर्ये सति अपि वास्तविकधर्मस्य मूलधर्मस्य च नितराम् अभावः एव दृश्यते । ततः एव चित्ते उद्वेगः जायते यत् 'अहो ! समाजे का स्थितिः वर्तते ! तथा च आगामिनि काले किं भविष्यति ?' इति ।

बन्धो ! विवेकपूतस्य ज्ञानस्य अभावः एव अस्याः स्थितेः निदानम् अस्ति । अस्माकं शासने न उत्पादनस्य (Production) प्रमाणस्य (Quantity) च मूल्यम्, अपि तु सर्जनस्य (Creation) गुणवत्तायाः (Quality) च माहात्म्यम् अस्ति । ततः तदा एव प्रभुभक्ति-तपो-महोत्सवादिबाह्यक्रियायाः सार्थक्यं, यदि तत्क्रियायां विवेकयुतस्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्य आधानं भवेत् । अन्यथा ज्ञानशून्यायाः तपोभक्त्याराधनादिक्रियायाः मूल्यम् अकिञ्चित्करम् एव, सा च क्रिया केवलं कायक्लेशः एव भवति । कदाचित् तु या कर्मनिर्जरायाः कारणं सा एव कर्मबन्धस्य कारणम् अपि स्यात् । अतः वस्तुतः तादृशी क्रिया दोषः एव ज्ञेयः । यदुक्तं च–

"जो उ गुणो दोसकरो, न सो गुणो, दोसमेव तं जाण" ।[१]

ननु यदि एवम् अस्ति तर्हि 'ज्ञानक्रियाभ्यां मोक्षः' इति कथम् उक्तम् ? इति शङ्का जायते । किन्तु अत्र अपि विवेकपूर्वकम् आलोचनीयम् ।

बन्धो ! यथा न ज्ञानमात्रेण मोक्षः, तथा एव न केवलं क्रियया अपि मोक्षः भवति । किन्तु द्वयोः समागमे सति एव मोक्षः भवति । एवं द्वयोः ज्ञानक्रिययोः समानता वर्णिता अस्ति । तथा अपि शास्त्रेषु क्रियातः ज्ञानस्य महत्ता विशेषतः निरूपिता । अत्र अपि शास्त्रपठनमात्रज्ञानस्य न मूल्यम्, किन्तु विवेकपूतस्य ज्ञानस्य एव । यतः कदाचित् पठितज्ञानस्य अजीर्णं भवेत् । तदा चित्ते स्वच्छन्दता–उद्धतता–अहङ्कारादिदुर्गुणाः उत्पद्यन्ते । पश्चात् च तादृशं ज्ञानं स्व–परयोः उभयोः अपकारकं भवति । शासने समाजे च महान्तं क्लेशं जनयति । अन्नस्य अजीर्णम् एकं भवम् एव नाशयति, किन्तु ज्ञानस्य अजीर्णं तु अनेकान् भवान् नाशयति, अतः ज्ञानस्य अजीर्णं तु अतीव दुष्टम् अस्ति । अधुना समाजे सङ्घे च क्लेशः वर्तते, तन्मूलम् अपरिणतं ज्ञानम् एव अस्ति । अतः एव विवेकयुक्तस्य ज्ञानस्य एव प्राधान्यम् अस्ति । तादृशं ज्ञानम् एव सूर्योपमं कथितम्, तथा खद्योततुल्या क्रिया प्ररूपिता अस्ति । एवं द्वयोः मध्ये बृहद् अन्तरं विद्यते ।

महोपाध्यायश्रीयशोविजयेन व्याकृतम् –

क्रियाशून्यं च यज्ज्ञानं ज्ञानशून्या च या क्रिया ।
अनयोरन्तरं ज्ञेयं भानुखद्योतयोरिव ॥ (ज्ञानसारप्रकरणम्)

यतः अज्ञानिनः बहुशः अनुकरणशीलाः परबुद्धिनिर्भराः च सन्ति । ततः एकेन यत् कृतं तद् द्वितीयेन, पश्चात् तृतीयेन, एवं परम्परया तद् एव क्रियते । अत्र तत्क्रियायाः रहस्यं लाभं च न के अपि जानन्ति । तेन कारणेन क्रियायाः कष्टं विषह्य

१. यः तु गुणः दोषकरः, न सः गुणः, दोषम् एव तं जानीहि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि तल्लाभेन तु वञ्चिताः एव भवेयुः । अतः एव अज्ञानक्रियायाः सकाशात् ज्ञानपूर्विकायाः क्रियायाः मूल्यम् अधिकम् अस्ति । ततः एव अज्ञानिनः अनेकैः वर्षैः तपोभिः आराधनादिभिश्च यत्कर्म क्षपयन्ति, तत्कर्म ज्ञानी क्षणमात्रेण एव क्षपयति ।

यदुक्तं च - जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तं नाणी तिहिँ गुत्तो खवेइ उस्सासमित्तेणं ॥[१]

भोः ! तामलितापसं स्मर । तेन दुष्करं तपः कृतम् । षष्टिं वर्षसहस्रं यावत् कठिनं दुःसहं च तपः कृतम् । 'तामलितापसेन यत्तपः अकारि, तत्तपसा एव सप्तजीवाः सिद्धिगतिं प्राप्नुयुः इत्येतावत् सामर्थ्यं तत्तपसि आसीत्" इति शास्त्रेषु कथितम् अस्ति। तथा अपि तत्तपः विवेकपूतज्ञानशून्यम् आसीत् । ततः तत्तपसा यत्फलं लभ्यं तन्न प्राप्तम्। एतेन अपि ज्ञायते यत्, ज्ञानान्वितायाः क्रियायाः एव माहात्म्यम् अस्ति ।

बन्धो ! सूपे कृशरे शाके च सर्वेषु व्यञ्जनेषु सत्सु अपि यदि लवणं न स्यात्, तर्हि तेषां यथार्थः आस्वादः न प्राप्यते । तथा एव तपोभक्तिक्रियादिकं सर्वं बहु बहुशः च क्रियते, किन्तु यदि तत्र ज्ञानं न स्यात् तर्हि तत्सर्वम् अपि निरर्थकप्रायं ज्ञेयम् । शास्त्रेषु तु तावत्कथितं यत् जीवदया अपि ज्ञानपूर्विका करणीया । ततः एव कथितं यत्-

"पढमं नाणं तओ दया" ।[२] (श्रीदशवैकालिकसूत्रम् ४/१०)

अद्य जनाः जीवरक्षार्थं प्रतिदिनं विपुलं धनव्ययं कुर्वन्ति । किन्तु ते एव स्वजीवने व्यवहारे च जीवदयायाः पालनं न कुर्वन्ति, न च तेषां जीववधे सति लेशः अपि उद्वेगः भवति, यतः ज्ञानस्य अभावः अस्ति । यदि ज्ञानयुता दया स्यात् तर्हि अत्र तत्र कुत्रचिद् अपि हृदि जीवरक्षणस्य भावः सदा रममाणः स्यात् । तादृशी दया एव वस्तुतः धर्मः अस्ति ।

किं च, बाह्यक्रियारूपं दानम् अपि विवेकयुक्तं देयम् । अन्यथा तद् दानम्

१. यद् अज्ञानी कर्म्म क्षपयति बहुभिः वर्षकोटिभिः ।
तत् ज्ञानी त्रिभिः गुप्तः क्षपयति श्वासोच्छ्वासमात्रेण ॥

२. प्रथमं ज्ञानं ततो दया ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि मोघम्, कर्मबन्धनस्य कारणं च भवति । यदि कः अपि दानबुद्ध्या मांसिकस्य छुरिकायाः दानं दत्त्वा मनसि तृप्तिम् अनुभवेत् यत् 'मया दानं कृतम्' इति तत् तु असाम्प्रतम् । यतः 'सः हन्ता अग्रे तच्छुरिकया अनेकान् जीवान् हनिष्यति । तत् तु महानर्थकरम् अस्ति, एवं यद् अनर्थकरं तत् कथं दानम् उच्यते ?' इति बोधः तदा जायते यदि चित्ते विवेकयुतं ज्ञानं स्यात् ! वस्तुतः येन धनस्य आसक्तिः क्षयेत्, दानग्राहकं प्रति बहुमानः आदरः च उत्पद्येत, तथा चित्ते कः अपि आशंसाभावः न भवेत्, तद् एव दानं ज्ञेयम् । उक्तं च –

यत् स्वयमदुःखितं स्यान्न च परदुःखे निमित्तभूतमपि ।
केवलमुपग्रहकरं धर्मकृते तद्भवेत् देयम् ॥

अद्य समाजे प्रतिदिनं दानरूपेण कोटीरूप्यकाणां व्ययः भवति । तत् सर्वं निरर्थकम् अस्ति, इति मत्कथनस्य न आशयः । किन्तु विवेकपूतज्ञानस्य अभावात् एवं भवति यत् 'यत्र न अस्ति धनस्य आवश्यकता तत्र विशेषतः दीयते, यत्र च आवश्यकता तत्र न कः अपि ददाति, ततः च समाजस्य कियन्ति कार्याणि अवसीदन्ति, तथा अन्यत्र धनस्य दुर्व्ययः भवति' इति । यदि खलु विवेकपूतज्ञानपूर्वकेण दानं प्रदीयेत तर्हि समाजस्य सङ्घस्य च कानिचिद् अपि कार्याणि न सीदेयुः । तथा च समाजे सङ्घे च यः क्लेशः वर्तते सः नश्येत्, एवं सर्वत्र शान्तिः प्रसरेत् । तदा एव वास्तविकरूपेण शासनप्रभावना भवेत् । एवं विवेकान्वितायाः क्रियायाः एव प्राधान्यम् अस्ति ।

अद्य जनाः उत्कृष्टं तपः कुर्वन्ति । अनेकवर्षपर्यन्तम् आचाम्लम् (रसहीनरुक्षम् आहारं) एकशः आहारं च कुर्वन्ति । केचित् जनाः तु एकोपवासाद् आरभ्य आशीत्युत्तरशतोपवासपर्यन्तं सानन्दं तपः विदधति । एवं विविधं तपः अधुना क्रियते। हन्त ! एतेन तपसा यदि न दुष्टमनोवृत्तिः दुर्बला भवेत्, विकृतिः न ह्रासं प्राप्नुयात्, न च चित्ते समत्वं जायेत प्रत्युत यदि क्रोध-लोभ-अहङ्कार-स्वप्रशंसा-बाह्याडम्बरादिदुर्गुणानां वृद्धिः एव स्यात्, तर्हि तेन तपसा कः लाभः ? वस्तुतः बाह्यतपसः साधनेन आभ्यन्तरतपसः सिद्धिः साधनीया । तादृशस्य तपसः सिद्धिः विवेकयुतस्य ज्ञानस्य द्वारेण एव भवति, न अन्यथा । तथा च तादृशं तपः एव कर्मनिर्जरायाः कारणं भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं च, तेन ज्ञानयुतेन तपसा चित्ते विवेकः सञ्जायते यत्, "मया एतत् तपः कथं कृतम् ? न तु आडम्बरार्थम् अपि तु चितविशुद्ध्यर्थम् आहारसंज्ञां न्यूनीकर्तुम्, समतालाभार्थं च एव कृतम्" इति । ततः तत्तपः एव धर्मरूपम् अस्ति, तदेव च लाभदायि अपि भवति ।

अद्य प्रभुभक्त्यासक्ताः जनाः विपुलं धनं व्ययीकुर्वन्ति, समयव्ययं च अपि कुर्वन्ति । किन्तु तत्पश्चात् यदि चित्ते मोहः जागृयात्, परिग्रहभावना उत्पद्येत, यत् व्ययीकृतं तस्य पुनः प्राप्त्यर्थम् आकाङ्क्षा उद्भवेत्, अहङ्कारः आगच्छेत्, तर्हि तया भक्त्या किं प्रयोजनम् ? सत्यम्, एतद्भक्तिः केवलं बाह्यधर्मरूपा न तु आत्मोन्नतिविधायिनी वास्तविकधर्मस्वरूपा च । यदि ज्ञानान्विता भक्तिः स्यात् तर्हि सा एव भक्तिः आत्मिकोत्थानस्य कारणं भवेत्, तथा च संसारस्य आसक्तिं क्षपयेत् । क्रमशः च धनमूर्च्छा गतप्रायिका भवेत्, तथा भगवन्तं गुरुं धर्मं च प्रति बहुमानः आदरः च चित्ते संजायेत । अन्यथा भक्तिशब्दः एव तत्र स्यात्, न तु तद्रहस्यम् । तदा च सा भक्तिः संसारोत्तारिणी न भवेत् ।

अद्य समाजे उत्कृष्टधर्मरूपा सर्वविरतिः दीक्षा बहुभिः गृह्यते । जननी-जनक-भ्रातृ-भगिनी-गृह-आपण-सर्वसुखसाधन-पदप्रतिष्ठादिकं सर्वम् अपि सन्त्यज्य दीक्षा स्वीक्रियते । किन्तु तत्पश्चात् यदि पूर्वस्नेहिजनानाम् आसक्तिः न अल्पीभवेत्, पूर्वानुभूतसुखं न विस्मर्येत, पूर्वकालीनमानप्रतिष्ठायाः अहङ्कारः सदा चित्ते रमेत, मनसि ईर्ष्या-क्षुद्रता-हङ्कारा-सूया-महत्त्वाकाङ्क्षा-सहिष्णुतादिकं प्रतिक्षणं प्रादुर्भवेत्, अन्येषां जनानां प्रतिबोधाय एव सर्वदा औत्सुक्यं वर्तेत, भक्तजनानां हितार्थं शिष्यवृद्ध्यर्थं च स्वाचारात् भ्रष्टता भवेत्, एवंरीत्या मनः अतृप्तिवशात् सदा व्याकुलं च भवेत्, तथा बाह्यसंसारं विहाय अतीव विस्तृतं समृद्धिपूर्णम् आभ्यन्तरसंसारं विरचय्य केवलं बाह्याडम्बरे एव मग्नाः भवेयुः, तर्हि दीक्षया किं प्रयोजनम् ? कः च लाभः ?

बन्धो ! संयमजीवनस्य वास्तविकाराधना तदा एव भवेत् यदा सा आराधना सज्ज्ञानपूर्विका स्यात् । तस्मिन् काले एव च संयमस्य यथार्थानुभूतिः स्यात् । एतादृशः जीवः "एतद् बाह्यक्रियया आत्मिकलाभः भवति न वा, मया स्वकल्याणार्थम् एव दीक्षा अङ्गीकृता, न तु केवलं परहिताय । ततः मत्संयमजीवनापकारिण्या आत्मिक-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणोत्कर्षबाधकया च परकल्याणचेष्टया अलम्" इति चिन्तयति ।

वस्तुतः स्वकल्याणे स्वगुणवृद्धौ स्वस्वभावे च रमणम्, तस्मिन् एव संयमजीवनस्य यथार्थता अस्ति, तदेव श्रेयस्करम् अस्ति । तर्हि एव सत्यरूपेण संसारविसर्जनस्य प्रक्रिया भवेत् । एवं ज्ञानयुतायाः एव दीक्षास्वरूपक्रियायाः माहात्म्यम् अस्ति ।

एवं शासने ज्ञानस्य अतीव मूल्यम् अस्ति । ज्ञानशून्या सर्वा अपि क्रिया अकिञ्चित्करा आभासिकी आडम्बररूपा च एव ज्ञेया । प्रथमं ज्ञानेन हेय-ज्ञेय-उपादेयस्य विवेकः जायेत, तदनु च या क्रिया क्रियते सा एव क्रियात्वेन व्याख्यायते । सङ्घं शासनं च केन्द्रीकृत्य या का अपि आराधना क्रियते सा एव वस्तुतः क्रिया, अन्यथा तु क्रियायाः व्याजेन प्रपञ्चः एव ज्ञेयः । ततः एतादृशी क्रिया एव धर्मत्वेन निरूपयितुं शक्या ।

अद्य जैनसमाजे जैनेतरसमाजे च पूर्ववर्णितस्य बाह्यधर्मस्य आडम्बरस्य च एव वृद्धिः दृश्यते, न तु वास्तविकरूपस्य धर्मस्य । अद्य समाजे क्रियायाः उदरे दुष्टावकरः विशेषतः वृद्धिं गतः अस्ति । धर्मे इयत्तायाः माहात्म्यं विस्तृतम् अस्ति । एतेन एवं कृतं, एवं कृतं, एतेन इयत् धनं व्ययीकृतम् । हन्त ! अद्य तु धर्मस्थानेषु धनव्ययेन एव धर्मः भवति, इति स्थितिः वर्तते । ततः यः बहु धनं व्ययीकरोति सः धर्मी इति ख्याप्यते, किन्तु सः तु आभासः एव । तथा अपि इदानीं समाजे बाह्यक्रियायाः एव साम्राज्यं दरीदृश्यते । ततः एव वयं सर्वे अपि सज्ज्ञानक्रियायाः शनैः शनैः अतीव दूरं गच्छन्तः स्मः । कदाचित् तादृश्या बाह्यक्रियया समाजे पूजा-मान-प्रतिष्ठा-प्रशंसादिकं सर्वम् अपि प्राप्यते, किन्तु मूलतः तु तत्सर्वम् आत्मोन्नतौ बाधकम् अस्ति । एवं सज्ज्ञानस्य अभावात् तादृशी धर्मरूपा क्रिया एव प्रेरणादातुः कारकस्य च दुर्गुणपोषकरूपा भवति। ततः एव प्राचुर्येण धर्मक्रियायां सत्याम् अपि सर्वत्र समाजे सङ्घे च क्लेशः असहिष्णुता असूयावृत्तिः ईर्ष्या च वरीवृत्यन्ते । सर्वस्याम् अपि धर्मसंस्थायां पदाकर्षणवृत्तिः अहङ्कारसाम्राज्यं च दरीदृश्यते । अहो ! खलु धर्मस्य व्याजेन एवं वर्तते । 'बाबरीमस्जिद'नाम्ना देशे नैकेषां जनानां हिंसाः भवन्ति । मुस्लिमजनैः 'जेहाद' नाम्ना आतङ्कवादः प्रसारितः । पाश्चात्यजनाः धर्मस्य व्याजेन मायाप्रपञ्चादिकं कुर्वन्ति । एवं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मस्य व्याजेन सर्वत्र क्लेशः एव प्रसृतः अस्ति । सूक्ष्मदृष्ट्या तन्मूलं निरीक्ष्यते तदा ज्ञायते यत्"ज्ञानस्य नितराम् अभावः एव वर्तते, अपात्रजनानां हस्ते एषः चिन्तामणिरत्नोपमः सर्वोत्तमधर्मः आपतितः अस्ति" । यदि एतज्जनानां चित्ते ज्ञानरूपस्य द्वारस्य उद्घाटनं भवेत् तर्हि स्वतः एव क्लेशः विनश्येत्, तथा च शान्तिः प्रसरेत् ।

एवं ज्ञानं-बोधः एव सर्वस्य मूलम् अस्ति । यथा यदि गृहस्य मूलं दृढं न स्यात् तर्हि तद् उपरि गृहरचना न सम्यक् जायते । कदाचिद् भवेत् तथा अपि भीतिः संभवेद् एव, यत् कदाचिद् अपि नश्येत् । तथा एव ज्ञानरूपं मूलं विना क्रियमाणस्य अपि बाह्यधर्मस्य न मूल्यम्, न कः अपि लाभः । एवं सर्वत्र ज्ञानयुतायाः क्रियायाः एव प्राधान्यम् अस्ति ।

अन्ते ज्ञानशून्यां क्रियां कुर्वतां जनानाम् अनुमोदनं न कुरुत, किन्तु वास्तविकधर्मस्य स्वरूपं बोधयतु । तथा वयं सर्वे अपि यां यां क्रियां कुर्याम, तां क्रियां ज्ञानपूर्विकां कुर्याम । एवम् आत्मिकधर्मोन्नतिः सिद्ध्येत्, इति मे स्पृहा ।

*

गुणानामेव दौर्जन्याद्, धुरि धुर्यो नियोज्यते ।
असञ्जातकिणस्कन्धः, सुखं जीवति गौर्गलिः ॥

शीलाङ्काचार्यकृतायाम्- आचाराङ्गवृत्तौ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुवादः

# स्वभावदर्शनम्

मुनिकल्याणकीर्तिविजयः

यदा मनुष्यस्य मनसि क्रोधः जागर्ति तदा सः क्रोधेन सह एव तदेकरूपः भवति। यदा च तन्मानसे कामनाः प्रकटन्ति तदा सः ताभिः कामनाभिः सह अपि तादात्म्यम् अनुभवति । निजं शुद्धं निर्मलं च अस्तित्वं विस्मरति । किन्तु यदि सः तदानीं क्षणम् अपि निजचित्तभ्रामके अस्मिन् झञ्झावाते स्थिरतया स्थातुं प्रयतते तिष्ठति च तर्हि तस्य अन्यः एव कश्चिद् विलक्षणः अनुभवः भवति । अत्र विषये झेन-गुरोः बान्केई-इत्यस्य कथनं स्मृतिपटे आलेखनीयम् ।

एकदा बान्केई-पार्श्वे कश्चिद् आगत्य निवेदितवान् -

गुरो ! मम स्वभावः अतीव कोपनशीलः । तं वशीकर्तुं किं कर्तव्यं मया ? कृपया मे उपायान् प्रदर्शयतु ।

गुरुणा उक्तम् - ननु विचित्रम् एतत् । परन्तु प्रथमं दर्शय तावत् तव स्वभावः कीदृशः अस्ति इति ?

अधुना तु न अहं तद् भवते दर्शयितुं समर्थः ।

तर्हि कदा दर्शयिष्यसि ?

यदा मम क्रोधाग्निः प्रज्वलिष्यति....

ननु तर्हि सः न ते स्वभावः भवितुम् अर्हति । यतः, यदि सः तव स्वभावः एव स्यात् तर्हि त्वं यदा कदा अपि तं मे दर्शयितुं शक्नोषि । किञ्च, यदा त्वं जातः तदा अपि तव अयं स्वभावः न आसीत् । तथा तव मातापितृभ्याम् अपि ते न अयं प्रदत्तः । अतः प्रशान्तचित्तेन एतद्विषये विचारं कुरु । स्वयमेव तव समाधानं भविष्यति।

[गूर्जरभाषायां मूललेखकः **श्रीमकरन्द-दवे**
"सूर्यनी आमन्त्रणपत्रिका' इति पुस्तके]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुवाद: प्राज्ञपुरुषस्य उत्तरा:

('मिलिन्द-पन्हा'त:)

मुनिकल्याणकीर्तिविजय:

(१)

आर्यनागसेन ! यस्य पुनर्जन्मग्रहणं न अस्ति, तादृशस्य पूर्णपुरुषस्य कदाचित् किञ्चिद् अपि दु:खं भवति किल ?

तस्य एकप्रकारकं दु:खं कदाचित् स्याद् अपि । परन्तु द्वितीयप्रकारकं दु:खं तु न कदाचित् कथञ्चिद् अपि सम्भवेत् ।

कृपया स्पष्टीकरोतु ।

तस्य शारीरिकं दु:खं तु स्याद् अपि महाराज ! किन्तु मानसिकं दु:खं न एव भवेत् ।

कथम् ?

शारीरिकदु:खस्य दवीयांसि नेदीयांसि वा कारणानि न अद्य अपि तस्य सर्वथा प्रणष्टानि । अत: तस्य शरीरसम्बन्धि दु:खं तु भविष्यति । किन्तु मानसिकदु:खस्य तु सर्वाणि अपि निमित्तानि तेन सर्वथा विनाशितानि । अत: तस्य मनोनिमित्तकं दु:खं तु न कदाचिद् अपि भविष्यति । भगवता बुद्धेन अपि कथितम् - "स: दैहिकं दु:खम् अनुभवति न तु मानसिकम्" इति ।

ननु तर्हि कथं स: देहत्यागं न करोति ?

महाराज ! तस्य न का अपि आसक्ति: ईर्ष्या वा काचित् विद्यते । तथा स: अपक्वानि फलानि अवचेतुं न इच्छति किन्तु तेषां पाककालं प्रतीक्षते । अत एव भिक्षुसङ्घस्य धर्मसेनापतिना 'सारिपुत्त' इत्यनेन कथितम् -

'न अस्ति मे मृत्यो: स्पृहा, न च अपि जीवनस्य लालसा । केवलं नि:स्पृहतया सावधानतया च अहं कालं गमयामि ।' इति ।

सुष्ठु स्पष्टीकृतम् आर्य ! ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आर्यनागसेन ! युष्मादृशाम् एकान्तवासिनां विरक्तानां च किं शरीरे रागः भवेत् कदाचित् ?

नहि महाराज !, विरक्ताः शरीरे आसक्ताः न भवन्ति ।

ननु तर्हि किमिति ते शरीरं पोषयन्ति ? किमर्थं च तस्य रक्षणादिकं कुर्वन्ति ?

भवन्तः यदा युद्धं गच्छन्ति युध्यन्ते च शत्रुभिः तदा किं कदा अपि शस्त्रप्रहारैः व्रणिताः भवन्ति वा ?

आम् ! नैकधा भवामः ।

तदात्वे महाराज ! भवतां व्रणानि औषधैः सज्जीकृत्य तैलादिभिः च आर्द्रीकृत्य पट्टिकासु बध्यन्ते न वा ?

अवश्यं बध्यन्ते, तद्रक्षणम् अपि क्रियते ।

तर्हि किं भवतां व्रणाः प्रियाः भवन्ति ? येन भवन्तः तेषाम् अति जागरूकतया रक्षणं कुर्वन्ति ?

न एवम् आर्य ! व्रणाः तु न एव प्रियाः अस्माकम् । किन्तु एवंकरणेन ते शीघ्रतया सज्जाः भवेयुः तथा तत्स्थाने नूतना त्वक् आविर्भवेद् इति एव एतत् सर्वं क्रियते ।

तर्हि महाराज ! अयम् एव न्यायः विरक्तैः अपि आश्रीयते । न हि ते शरीरे विलग्नाः आसक्ताः भवन्ति । किन्तु निर्मलस्य निरामयस्य च जीवनस्य कृते एव शरीरं पोषयन्ति । भगवता बुद्धेन इदं शरीरं व्रणोपमं वर्णितम् । भिक्षवः हि अतः एव शरीरं सहन्ते पोषयन्ति रक्षन्ति च, किन्तु सर्वथा अनासक्तभावेन ।

शोभनम् उक्तं भवता आर्य ! ।

★



Jain Education International For Private & Personal Use Only www.jainelibrary.org

( ३ )

आर्यनागसेन ! किं भवन्तः भिक्षवः अतीतकालीनं शोकं विनाशयितुं प्रयत्नं कुर्वन्ति वा ?

न एव महाराज !

तर्हि भाविनं शोकं व्यपगमयितुं प्रयस्यन्ते वा ?

नहि महाराज !

तर्हि वर्तमानं शोकं दूरीकर्तुं प्रयतन्ते वा ?

न, तम् अपि न !

ननु भूतकालीनस्य भविष्यतः साम्प्रतस्य च शोकस्य विनाशाय भवन्तः न यतन्ते तर्हि किं कर्तुं भवन्तः प्रयतन्ते ?

महाराज ! भवान् अपि कीदृशं प्रश्नं पृच्छति ? वयं हि शोकाख्यं यद् वस्तु अस्ति, तत् सर्वथा यथा विनश्येत पुनः च कदाचिद् अपि न उत्पद्येत इति एतदर्थम् एव प्रयतामहे ।

ननु नागसेनार्य ! अधुना अस्मिन् क्षणे भाविकालीनस्य शोकाख्यवस्तुनः अस्तित्वं विद्यते वा ?

नहि महाराज ! तत् तु अहम् अपि स्वीकरोमि ।

तर्हि यद् न अस्ति एव तद् दूरीकर्तुं प्रयतमाना भवन्तः अतिशयेन चतुराः दृश्यन्ते ।

महाराज ! भवतः प्रतिस्पर्धिनः राजानः भवतः नगरं कदाचिद् आक्रामन्ति वा ?

नूनम् आक्रामन्ति ।

ननु तदात्वे एव, मन्ये अहं यद्, भवान् प्राकारं प्रगुणीकुर्याद् वा, परिखादिकं खनयेद् वा नगराद् बहिः, शत्रुनिरीक्षार्थं कूटादिकं कारयेद् वा, धान्यसञ्चयं कुर्याद् वा ?

न एव आर्य ! नहि एव । तत् सर्वं तु पूर्वम् एव प्रगुणीभूतं स्यात् ।

तर्हि तदा एव भवान् भवतः सैनिकाः च गजाङ्कुशनम् अश्वारोहणं रथचालनं शस्त्रक्षेपणं च इत्यादिकम् अभ्यस्यन्ति वा ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नहि नहि आर्य ! तत् सर्वं तु पूर्वम् एव सम्यक्तया अभ्यस्तं भवेत् ।

किमर्थं ननु तत् सर्वम् ?

आयतिभयं दूरीकर्तुं खलु !

कथम् एवम् ? अधुना अस्मिन् क्षणे 'आयति'नामकं किञ्चित् वस्तु विद्यते वा ?

न एव आर्य ! एतत् तु स्वीकरोमि अहम् ।

तर्हि यद् न अस्ति एव तद् दूरीकरणाय प्रयतमानः भवान् अतीव दक्षः खलु !

सत्यम् उक्तं भवता आर्य ! किन्तु अन्यद् अपि एकम् उदाहरणं यदि दीयेत तदा सन्तोषः भवेत् ।

महाराज ! कथयतु मां यद् यदा भवन्तं पिपासा बाधते तदा एव भवान् कूपखननं तडागनिर्माणं वा कारयति खलु ?

नहि आर्य ! कूप-तडागादिकं तु पूर्वम् एव कृतं भवति ।

किमर्थं ननु ?

भाविकालीन-तर्षस्य अपगमार्थम् ।

कथम् एवम् ? अधुना अस्मिन् क्षणे 'भावि-तर्ष'नाम किञ्चित् वस्तु विद्यते वा ?

न एव भगवन् !

तर्हि महाराज ! यद् न अस्ति एव तादृशम् अपि भाविपिपासादिकं दूरीकर्तुं प्रयतमानाः भवन्तः अतीव चतुराः दृश्यन्ते ।

अवगतं नागसेनार्य ! अवगतं भवतां जीवनसाधनायाः तात्पर्यम् ।

(स्थूलजीवनसाधनावत् आत्मिकजीवनसाधना अपि अनिवार्या एव साधकानाम् इति सम्यग् ज्ञात्वा तत्साधनायाः च रहस्यम् अपि अवबुध्य मिलिन्दस्य चित्तं सुप्रसन्नम् अभवत् ।)

[गूर्जरभाषायां मूललेखकः **श्रीमकरन्द-दवे**
"सूर्यनी आमन्त्रणपत्रिका" इति पुस्तके ॥]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# अहो ! बुद्धिमत्ता *

विजयसूर्योदयसूरिः

प्राचीनकालस्य इयं कथा । शकटद्वारेण तदा व्यापारः चलन् आसीत् ।

कः अपि एकः व्यवहारी आसीत् । सः शकटान् भृत्वा व्यापाराय चलति स्म ।

शकटवाहकेन कथितम् – "चौरवृन्दैः भयानकः अयं मार्गः अस्ति, अतः आरक्षकान् सह आनयतु" इति ।

"त्वं मा भैषीः, व्यापारकारिणं न कः अपि उपलक्षयति" इति व्यवहारी अवोचत् । ततः शकटाः चलिताः । सञ्जातः अन्धकारः । तदा एव लुण्टाकाः आगताः । त्वरितम् एव तैः लुण्टिताः शकटाः ।

इतः सः व्यवहारी तु लुण्टाकान् निरीक्ष्य एव शकटात् उत्तीर्य दूरं गतः । तत्र आत्मानं विगोप्य स्थितः सः । लुण्टाकेषु गतेषु सः निरगात् बहिः ।

शकटवाहकेन गदितम् – मया पूर्वम् एव कथितम् आसीत् – आरक्षकान् सह गृह्णातु, इति । अधुना तु गतं सर्वस्वम् ।

तदा व्यवहारिणा विहस्य भणितम् – "किमर्थं त्वं चिन्तां करोषि ? गतं चेत् भवतु ! किं तेन ? यतः तेषां वस्तूनां मूल्यपत्रिकाम् आदाय एव दूरं गत्वा अहम् अतिष्ठम् ।

शकटवाहकः आह – "वस्तुभ्यः अपि किम् इयं मूल्यपत्रिका अर्घ्या" ?

आम्, आम् । यतः ते तां विना केन मूल्येन वस्तूनां विक्रयं करिष्यन्ति ? इति उक्त्वा सः व्यवहारी उच्चैः हसितवान् ।

★

* एताः कथाः पूज्याचार्यश्रीविजयसूर्योदयसूरिमहाराजैः स्वविद्यार्थिकाले लिखिताः आसन् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# श्रुतिव्यसनम्

विजयसूर्योदयसूरिः

हरिदासः नाम एकः श्रेष्ठी आसीत् । सः च परमविष्णुभक्तः । सः आद्वादशवर्षात् 'भागवतं' शृणोति स्म । प्रतिदिनं व्यासः कथार्थम् आगच्छत् ।

एकदा हरिदासः व्यासाय अकथयत्- "कल्ये अहं बहिः गमिष्यामि । कथायाः श्रवणं कथं करिष्यामि ? यतः नियमस्य भङ्गः भविष्यति" इति ।

व्यासः आह - कथां करिष्यामि अहम्, भवत्पुत्रः श्रवणं करिष्यति । ततः न नियमभङ्गः भवेत् ।

तत् श्रुत्वा विस्मितः सन् हरिदासः उवाच- प्रभो ! न एवम्, सः तु बालः, सः च सरलहृदयः । ततः कथां श्रुत्वा संसारात् विरक्तः भवेत् कदाचित् ।

व्यासः अवाक् - भवान् एतां कथां द्वादशवर्षात् शृणोति, न च तथा अपि विरक्तः जातः । तर्हि अयं तु कथम् एकदिनेन एव कथां संश्रुत्य विरक्तः भविष्यति ?

तदा श्रेष्ठिना व्याकृतम् - अयं बालः अस्ति । "श्रुते कुत्र प्रवर्तितव्यं कुत्र न" इति न जानाति एषः ।

**अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः ।**
**अर्थं हितमहितं वा न वेत्ति येनाऽऽवृतो लोकः ॥**

[शीलाङ्काचार्यकृतायाम्-आचाराङ्गवृत्तौ ।]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# द्वयोः द्वन्द्वे सफलः तृतीयः

विजयसूर्योदयसूरिः

आसीत् कः अपि एकः क्षत्रियपुत्रः । सः सुखी वीरः च आसीत् ।

एकदा तस्य गृहे चौरः आगतः । कृतं चौर्यम् । तदा एव उत्थितः क्षत्रियः । तत् चौरं बद्ध्वा राजपुरुषाय अदात् सः । राजपुरुषः तम् आदाय न्यायसभायाम् अगात् ।

तत्र चौरेण गदितम् - "एतेन क्षत्रियेण मे धनम् अपहृतम् " इति ।

एतत् श्रुत्वा त्वरितम् एव क्षत्रिय आह- "मम धनम् एतेन चोरितम्" इति ।

अन्ते "गृहप्रवेशापराधं चौरे निश्चित्य चौरः अयं द्विमासं यावत् कारागारे तिष्ठतु" इति न्यायाधिकारिणा आज्ञापितम् ।

"मम धनं दीयताम्" इति क्षत्रियेण कथितम् ।

तदा न्यायाधीशः अवदत् - "इदं धनं भावत्कम् इति साक्षिणं विना कथं निश्चेतुं शक्यम् ? अतः गत्वा साक्षिणम् आनयतु । यदि ते कथयिष्यन्ति 'धनम् अस्य अस्ति' इति तदा दापयिष्यामि" ।

तदा क्षत्रियः अवक् - यत्, महाचौरः आगतः, चोरितं च धनम्, तदा कुतः साक्षी ?

न्यायाधीशः उवाच - "साक्षिणं विना कथं धनं दीयते ?"

ततः क्रुद्धः सन् क्षत्रियः चौराय चपेटां दत्त्वा कथितवान् - "रे ! मूर्ख ! त्वं चौर्याय आगतः तदा घोटके उपविश्य आगतः चेत् तर्हि तम् अपि साक्षीकृत्य धनं मम स्वाधीनं कर्तुं शक्यम् अभविष्यत्, किन्तु अधुना तु न धनं मम अभूत्, न तव" इति ।

★



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# कृतज्ञता

मुनिरत्नकीर्तिविजयः

प्रातःकालीनः समयः आसीत् । गृहे सर्वेऽपि सुखनिद्रायाः उत्सङ्गम् आश्रिताः आसन् । सामान्यतः अपि तस्मिन् गृहे त्रयः एव सदस्याः आसन् - पिता चीमनलालः तस्य पुत्रः मनुः, पुत्रवधूः रमा च इति ।

लघुः अपि शब्दः अप्रीतिकरः स्यात् एतादृशः समयः आसीत् सः । सहसा एव महानसे भाण्डानां पतनेन वातावरणं क्षणं शब्दमयं सञ्जातम् ।

'ओह्....सुखेन शयनम् अपि अस्मिन् गृहे न भवति' - निद्राभङ्गात् सरोषम् उक्तवती रमा । सम्मुखम् एव उत्थितं श्वसुरं सा दृष्टवती । सः किञ्चिद् भीतः विलक्षः इव च सञ्जातः आसीत् ।

'वधु ! सम्यक्तया द्रष्टुं न शक्नोमि । उपनेत्रं परिवर्तितव्यम् इति प्रतिभाति । अनेन काष्ठफलकेन स्खलितः अहम्' - सः उवाच । एवं श्रुत्वाऽपि रमा किमपि अनुक्त्वा मुखं विवर्ण्य कार्ये मग्ना जाता । किन्तु एतादृशेन व्यवहारेण सः- 'किमर्थम् एतादृशः उपेक्षापूर्णः व्यवहारः क्रियते मया सार्द्धम् ? किम् अहम् एतस्मिन् गृहे अनुपयोगी वा अतिरिक्तः वा अस्मि ?' - इति विचिन्त्य खिन्नः जातः । एवमेव कतिचिद् दिनानि यावत् तेन उपनेत्रस्य वार्ता अपि न पुनः उच्चारिता ।

किन्तु गच्छता दिनेन तस्य नेत्रस्य व्याधिः अपि वृद्धिं गतः । अतः एकदा पुत्रम् उद्दिश्य उक्तवान् - वत्स ! मम नेत्रयोः चिकित्सा यथाशीघ्रं करणीया प्रतिभाति । सम्यक्तया द्रष्टुं न पारयामि, अन्धः इव अनुभवामि । कथाश्रवणार्थं गमने अपि- कदाचित् स्खलनं प्राप्य पतिष्यामि - इत्येव भयं वर्तते सततम् ।

किमपि प्रत्युत्तरं पुत्रः यावद् ददाति तावद् एव रमा उक्तवती-सामान्यतः तु गृहे



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव स्थातव्यं भवति भवता खलु । कञ्चित् कालं कथाश्रवणं यदि न स्यात् तर्हि तत्र का नाम हानिः भवतः ?

एतादृशं वचनं श्रुत्वा पिता स्तब्धः अभवत् । किन्तु मनुः वार्तातन्तुं हस्तेकृत्य उक्तवान् – आगामिनि रविवासरे अस्माकं महाविद्यालयात् अजंता-इलोरा-दोलताबादादीनां स्थलानां प्रवासः आयोजितः अस्ति । सर्वेऽपि प्राध्यापकाः पत्नीभिः सह आगमिष्यन्ति.....

भवतु, भवतु । तर्हि त्वं रमा चाऽपि अवश्यं गच्छताम् – तस्य वार्तायाः भावार्थम् अवबुध्य मध्ये एव पिता अवदत् ।

किन्तु तत्र व्ययः अधिकः भविष्यति । एतेन च भवतः उपनेत्रस्य कार्येऽपि विलम्बः भविष्यति । किं तावद् धैर्यं शक्यम् अस्ति ? – अपराधभावेन मनुः उक्तवान् ।

पिता तु सहसा आम् आम् इति स्वसम्मतिं सूचयित्वा कथमपि स्वस्थतां प्राप्तवान् । किन्तु तूष्णीं स्थातुम् अशक्ता रमा पुनरपि तत्र स्वाभिप्रायं दत्तवती – 'मासपर्यन्तं प्रतीक्षाकरणात् तु महाजनसञ्चालिते चिकित्सालये यदि अगमिष्यत् तर्हि विना मूल्यम् एव कार्यम् अभविष्यत् इत्येव शोभनम्' इति । पित्रा तु सर्वम् अपि एतत् स्वस्थतया श्रुतं सोढं च ।

मनुः रमा च मित्रपरिवारेण सह प्रवासार्थम् अगच्छताम् । प्रवासं कुर्वन्तः सर्वेऽपि दोलताबादम् प्राप्तवन्तः । तत्रत्यं प्राचीनं प्राकारं निरीक्ष्य सर्वेऽपि चर्चां कुर्वन्तः उपविष्टाः आसन् । प्राकारस्य भग्नां जीर्णाम् उपेक्षितां च अवस्थां दृष्ट्वा सर्वेषां खेदः जातः । तदा एव एकः विद्यार्थी अवदत् – "यथा वयम् अस्माकं वृद्धानां मातापितृचरणानां परिचर्यां सप्रेम कुर्मः तथैव किम् एतादृशां पुरातनानाम् ऐतिहासिकदृष्ट्या च महत्त्वपूर्णानां स्थलानां रक्षण-संवर्धनादिकम् अस्माकं कर्तव्यं नास्ति खलु ?"

एषा चर्चा तु दीर्घं प्रवृत्ता । किन्तु 'मातापितृचरणानां सप्रेम परिचर्या' इति विद्यार्थिना सहजम् आर्द्रभावेन उच्चारिताः शब्दाः मनोः हृदये व्यथाम् उत्पादयन्तः आसन् । सः शून्यमनस्कः जातः । कस्याम् अपि चर्चायां सः भागं वोढुं न अशक्नोत् । तस्य हृदयसमक्षं स्वकीयः भूतकालः उपस्थितः अभूत्-'स्वविकासार्थं पिता किं किं न



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतवान् ? शालायां तु सः शिक्षकः आसीत् । बहुकष्टेन आजीविकां निर्वहति स्म सः । एवं सत्यपि मम अभ्यासार्थं तेन कियान् श्रमः निर्वोढः ! स्वकीयाम् आवश्यकताम् अपि सङ्कोच्य मम अभ्यासार्थं धनव्ययः कृतः । एकेन एव वस्त्रयुगलेन कथम् अपि सः वर्षं यापयति स्म । एतावत्पर्यन्तं तेन स्वकीया आवश्यकता गौणीकृता आसीत् । पश्चात् मम विवाहादि कार्यम् अपि तेन निर्वर्तितम् । पश्चाच्च रमायाः आभरणविषयकायाः अभिरुचेः पोषणार्थम् आजीवनं श्रमं कृत्वा सञ्चितं धनम् अपि निःसङ्कोचं दत्तवान् । किञ्च, अहं तु कीदृशः ? अद्यावधि कदापि काऽपि इच्छा तेन मम पुरतः न प्रकटिता । मम प्रसन्नतायाम् एव स्वप्रसन्नतायाः समावेशः तेन कृतः । अद्य तु प्रथमम् एव अहम् उपनेत्रार्थं सूचितः । तदपि नेत्रयोः व्याधेः कारणात् न तु स्वरुचिपोषणार्थम् । तादृशी सामान्या अपि आवश्यकता तस्य मया न पूरिता ? अनिवार्ये अपि तत्कार्ये व्याजाः प्रदर्शिताः मया ? कीदृशः कृतघ्नः अहम् ?" इति । एवं विचारयतः तस्य समक्षं विना उपनेत्रम् इतः ततः स्खलतः पततः व्यथां च अनुभवतः स्ववृद्धपितुः मूर्तिः आगता । प्रवासादिकात् मनोरञ्जकात् कार्यक्रमात् तस्य मनः प्रतिनिवृत्तम् । अथ लघुः अपि प्रसङ्गः सहजम् एव पितुः एव साक्षात्कारं जनयति स्म । तस्य हृदयम् एव तं पीडयति स्म । प्रवासं समाप्य कदा गृहं प्राप्नुयाम् - इति अधैर्यं जातं तस्य । स्वकृत्यार्थं ग्लानिम् अनुभवति स्म सः । अतः 'गृहं गत्वा सर्वप्रथमं पितुः नेत्रयोः चिकित्साम् एव कारयिष्यामि' इति अचिन्तयत् ।

अस्मिन् चिन्तने एव गृहं प्राप्य तेन विद्युद्घण्टिका वादिता । स्वस्य अपराधात् मुक्तः भवितुं तस्य आकाङ्क्षा उद्दीप्ता जाता आसीत् । क्षणेन द्वारम् उद्घटितम् । वात्सल्यं वर्षयन् पिता एव तस्य समक्षम् उपस्थितः आसीत् । परन्तु किम् एतत्.... ? नवीनम् अपनेत्रं तस्य मुखे शोभमानम् आसीत् । तद् दृष्ट्वा तस्य चित्तं पुनः विचारचक्रे पतितम् ।

पिता तु तम् आगतं दृष्ट्वा एव प्रसन्नीभूय कुशलवार्तां प्रष्टुं लग्नः - 'अहो ! अहो ! आगतः त्वम् ? आगच्छतु आगच्छतु । कीदृशः जातः प्रवासः ? काऽपि प्रतिकूलता तु न अनुभूता खलु ? इदानीं शीतकालः प्रवर्तते अतः ततः रक्षणार्थं पर्याप्तं वस्त्रादिकं नीतं न वा ?' इत्यादि । किन्तु एकः अपि तस्य शब्दः तस्य कर्णम् उल्लङ्घ्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्ते न प्रविष्टः एव । तस्य दृष्टिः तु नवीने उपनेत्रे एव स्थिरा जाता आसीत् । विचारमग्नः स जातः यद् – 'किं पिता महाजनसञ्चालिते चिकित्सालये गतः अभविष्यत् ? किन्तु न एतत् शक्यम्, यतः तत्र एतावत् मूल्यवत् उपनेत्रं न उपलभ्यते'– इति ।

एवं विचिन्त्य अपि तदर्थं सः पृष्टवान् – किं भवान् महाजनस्य चिकित्सालये गतः आसीत् ?

'अरे ! नैव नैव । एतत् तु.... तदा प्रकाशजोशी नामकः विद्यार्थी आसीत् । भवतः अग्रिमायां कक्ष्यायां सः पठन् आसीत् । उपलक्षितः खलु त्वया ?'

एवं संश्रुत्य विद्यार्थिकालः तस्य स्मृतिपथम् आगतः । सः चिन्तितवान् यत् 'एकः प्रकाशनामकः विद्यार्थी आसीत् । सः दरिद्रः आसीत् किन्तु अध्ययने तु कुशलः मेधावी च आसीत् । पितुः सः स्नेहपात्रम् अपि आसीत् । पिता अपि तस्य अभ्यासे सदा सप्रेम साहाय्यं विदधाति स्म ।' एवं स्मृत्वा सहसा सः उवाच–

'आम् आम् ! उपलक्षितः । किन्तु किं तेन ?'

'प्रातः एव सः गृहम् आगतवान् आसीत् । सः प्रतिष्ठितः नेत्रचिकित्सकः जातः अस्ति । एतावतीं महतीं प्रतिष्ठां लब्ध्वा अपि तस्य स्वभावः पूर्ववत् विनम्रः एव अस्ति । तत्र किमपि परिवर्तनं न जातम् । आगमनेन सह एव प्रथमं मम पादसंस्पर्शनं कृतवान् । तत्क्षणं तु मया सः न उपलक्षितः किन्तु क्षणेन सर्वं स्मृतिपथम् आगतम् । पश्चाच्च भिन्नं भिन्नं कुशलवार्तादिकं प्रवृत्तम् । तत्र मध्ये मम नेत्रयोः रोगस्य अपि वार्ता सञ्जाता । सः मम नेत्रे निरीक्षितवान् । पश्चात् तु हठात् मां नवीनोपनेत्रार्थं नीतवान् । मया बहुशः वारितः किन्तु एकम् अपि मम निषेधवचनं सः न अङ्गीकृतवान्' – एवम् उक्तवतः पितुः स्वरः गद्गदः जातः । नेत्रे अपि क्लिन्ने जाते ।

अनेन प्रसङ्गेन तु पितुः दृष्टिः तु स्पष्टा जाता एव किन्तु तेन सह एव पुत्रः अपि सम्यक्तया बोधं प्राप्तवान् ।

★



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# आचरणेन सिद्धिः

**मुनिधर्मकीर्तिविजयः**

एकेन साधकेन पृष्टम् - प्रभो ! जीवने कीदृशी साधना करणीया ?

तथागतः आह- आन्तरदृष्ट्या जीवने निर्दोषता उदारता च अभ्यसनीया । तथा बाह्यदृष्ट्या व्यवहारे सर्वान् जीवान् प्रति दयाभावना करणीया । तथा च मुख्यतः सत्यम् आचरणीयम् ।

साधकः उवाच- अहो ! एतत् तु सप्तवर्षीयः बालः अपि जानाति ।

तथागतः अब्रवीत् - सत्यं ते कथनम् । सत्यस्य आचरणं करणीयम्, निर्दोषम् उदारं च जीवनं जीव्यम्, सर्वेषां जीवानां दया पालनीया, इत्यादिकं सर्वं सप्तवर्षीयः बालः जानाति । किन्तु वृद्धजनाः अपि तस्य आचरणे तु न प्रभवन्ति । अतः वस्तुतः आचरणम् एव मुख्यम् । न तु ज्ञानमात्रम् ।





Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथा

# देवधनभक्षणदोषः

मुनिधर्मकीर्तिविजयः

इन्द्रपुरं नाम नगरम् आसीत् । तत्र देवसेनाभिधः श्रेष्ठी वसति स्म । परिवारेण सह सः श्रेष्ठी सानन्दं ससुखं च कालं गमयति स्म ।

अथ तस्य गृहे प्रत्यहम् एका उष्ट्रिका आयान्ती आसीत् । तस्याः स्वामी गोपालः अपि नित्यं तत्र आगत्य तां कुट्टयित्वा स्वस्थानं प्रति नयन् आसीत् । तथा अपि सा पुनः पुनः स्वस्वामिनं वञ्चयित्वा देवसेनश्रेष्ठिनः सदनम् एव उपाविशती आसीत् । एषः तस्याः नित्यक्रमः आसीत् ।

एकदा नगरे पूज्यपादाः सूरिपुङ्गवाः समवासरन् । सः श्रेष्ठी तान् वन्दितुं गतः । तेन पृष्टम् – प्रभो ! एका उष्ट्रिका मद्भवने एव प्रतिदिनम् आगच्छति, तत्र एव च रतिं प्राप्नोति, किम् अत्र कारणम् ?

सूरीश्वराः आहुः – पूर्वभवे एषा तव माता आसीत् । सा पूर्वभवे प्रतिदिनं जिनेश्वरस्य अग्रे स्थितेन दीपेन एव स्वगृहस्य दीपं प्रज्वाल्य सर्वाणि अपि कार्याणि कुरुते स्म, तथा च तत्रत्येन एव धूपाङ्गारेण चुल्लीम् अपि प्रज्वालयति स्म । तत्कारणेन मृत्वा अधुना सा उष्ट्रिका जाता । एवं पूर्वजन्मनः स्नेहात् भवादृशः स्नेहिजनान् संदृश्य इदानीम् आनन्दं प्राप्नोति ।

एतत् श्रुत्वा एव श्रेष्ठी उद्वेगीबभूव । पश्चात् तेन पृष्टम् – प्रभो ! किं कः अपि उपायः अत्र अस्ति ?

तदा गुरवः ऊचुः – 'त्वं तस्याः समीपं गत्वा पूर्वभवनाम्ना आह्वय, तथा कर्णयोः मध्ये देवधनभक्षणस्य वृत्तान्तं श्रावय, तेन सा बोधं प्राप्स्यति" ।

तेन श्रेष्ठिना अपि गुर्वादेशानुसारेण सर्वं कृतम् । ततः सा बोधं जातिस्मृतिं च प्राप्तवती । अन्ते सा अपि सज्ज्ञानम् अवाप्य सचित्तभक्षणादित्यागनियमं गृहीत्वा, मनसः अनुतापेन पूर्वभवकृतं पापं विनाश्य च देवत्वं [illegible] ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# व्यङ्ग्यकथा

मुनिरत्नकीर्तिविजय:

दिल्लीनगरे संसदभवनस्य पुरोभागे भिक्षुक: एक: पत्न्या सह उपविष्ट: आसीत्। भिक्षुकाणां भिक्षास्थानानि प्राय: नियतानि भवन्ति । स: अपि नित्यं तत्र एव आगत्य उपविशति स्म । तत्र अनेकराजकीयपुरुषाणां विभिन्नानाम् अधिकारिजनानाम् आरक्षकगणस्य च गमनागमनं सततं प्रवर्तते स्म । स: अपि तेषां यातायातं दृष्ट्वा मनसि किम् अपि विचारयन् उपविशति स्म । तेऽपि जना: तस्मै न्यूनाधिकं किम् अपि ददति स्म । एवं च तस्य स्वस्थित्यनुरूपं सुखेन दिनानि गच्छन्ति ।

नित्यम् इव प्रधानमन्त्रिमहोदय: अन्यै: मन्त्रिभि: आरक्षकगणै: च परिवृत: अद्याऽपि आगत: । तस्य तादृशं वैभवं प्रभावं च दृष्ट्वा किम् अपि विचार्य स: स्वपत्नीम् अवदत् -

- भो: ! कदाचित् एवं स्यात् यत् अहम् अपि एतादृश: प्रधानमन्त्री स्याम्, तर्हि....
- किम् ? किम् ? ... तं वाक्यमध्ये एव तूर्ष्णीं कृत्वा पत्नी अवदत् - किम् ? प्रधानमन्त्री ? स: अपि भवान् भवेत् ? तूर्ष्णीं तिष्ठतु, तूष्णीम् ! गगनविहारं त्यक्त्वा पृथिव्याम् एव चलतु !
- शृणु रे तावत् ! अहं तु केवलं मम विचारं श्रावयामि यत्....
- अरे ! किन्तु क: अर्थ: एतस्य अशक्यविचारस्य ?
- अयि मुग्धे ! अहम् अपि जानामि यत् एतत् न शक्यम् । किन्तु, एतत् तु काल्पनिकम् एव केवलं यत् कदाचित् एवं स्यात्..... । तस्य श्रवणे तव का नाम हानि: ? समययापनम् अपि भविष्यति ।
- भवतु नाम, श्राबयतु ।
- मन्यस्व यत् यदि अहं प्रधानमन्त्री स्याम्, तर्हि किं स्यात् तत् जानासि ? ...



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृणु, तदा, यावत् धनम् एषः प्रधानमन्त्री अद्य प्राप्नोति ततोऽपि अधिकं धनम् अहं प्राप्नुयाम् ।

* कथम् ? कथम् ?
* अत्यन्तं सुकरम् एतत् । पश्यतु, यदि अहम् एतादृशः स्याम् तर्हि यावत् धनम् एषः प्राप्नोति तत् तु अहम् अपि प्राप्नुयाम् ! सत्यम् ?
* सत्यम्, किन्तु अधिकं कथम् ?
* तत् एव कथयामि, कथम् अधीरा भवसि ? शृणु, एतेन तुल्यं धनं तु प्राप्स्यामि एव, अपरं च पार्श्ववृत्ति (Side business)रूपेण एषा अस्माकं प्रवृत्तिः (भिक्षाप्रवृत्तिः) अपि प्रचलिष्यति एव ! ज्ञातम् ?.....

दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं
रागान्धस्तु यदस्ति तत् परिहरन् यन्नाऽस्ति तत् पश्यति ।
कुन्देन्दीवरपूर्णचन्द्रकलशश्रीमल्लतापल्लवा-
नारोप्याऽशुचिराशिषु प्रियतमागात्रेषु यन्मोदते ॥

**(शीलाङ्काचार्यकृतायाम्- आचाराङ्गवृत्तौ)**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## रङ्गमञ्चः



# धनेन दानवः दयया मानवः


**स्वामी श्रीब्रह्मानन्देन्द्रसरस्वती**
योगवेदान्तमहाविद्यापीठम्,
मत्तीकोप्प पो. कल्मने
ता. सागर जि. शिवमोग्ग
कर्णाटक - ५७७४०१


**पात्राणि**

| | |
|---|---|
| **अण्टोनियः** | वेनिसनगरनिवासी वणिक् |
| **बेस्सानियः** | तस्य सखा |
| **पोर्षिया** | बेस्सानियस्य प्रियवधूः |
| **शैलाकः** | यहूदी कुसीदकः |
| **जेस्सिका** | तस्य पुत्री |
| **लोरेन्जः** | तस्याः कामी |
| **मोरक्को-राजकुमारः**<br>**आरगेन्द्रः** | पोर्षिया-पाणिग्रहणकाङ्क्षिणौ |
| **ड्यूक्-नरेशः** | वेनिस्-प्रभुः |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

(**भूमिका :** पुरा इटलीदेशस्य विश्रुते वेनिस्-नगरे अण्टोनियः नाम वणिग्वर्यः निवसति स्म । सः च दूरविदूरदेशीयैः सह समुद्रयानमुखेन बृहन्नौकासु खाद्य-वस्त्राभरणादिबहुमूल्यानां सामग्रीणाम् आयात-निर्यातवाणिज्यं प्रचालयति स्म । धनिकः अपि स सरलजीवी उदारस्वभावः बहुजनप्रियः च आसीत् ।

अण्टोनियस्य प्रियसुहृत् बेस्सानियः नाम योधः निकटवर्तिनि बेल्माण्ट्-नाम-नगरे निवसन्त्यां पोर्षिया-नाम्न्यां सुरूपलावण्यवत्यां ललनायां गाढानुरक्तः आसीत् । परं तस्याः सुन्दरीमण्याः पाणिग्रहणाय अवश्यमुपपादयितव्यस्य कन्याशुल्कस्य स्वर्णमुद्राणां सहस्रस्य उपपादने सः असमर्थः आसीत् । अतः सुहृत्सखाय अण्टोनियाय धनसाहाय्यं याचितुकामः सः कदाचित् राजोद्याने तेन सह विहरन् स्वोद्दिष्टं तस्मै प्रास्तवीत् ।)

## प्रथमं दृश्यम्

**बेस्सानियः** मित्र ! कश्चिद् युवा सर्वथा समर्थः तेजस्वी मेधावी शीलसम्पन्नः च लावण्यवतीं कोट्यधिपतिदुहितरं श्रीमतीं प्रीणाति । तां च परिणेतुम् उत्सुकः अस्ति । परं सः असौ युवा यद्यपि न दरिद्रः तथा अपि न धनिकः अपि । तेन हि परिणयसिद्ध्यै किं वा करणीयम् ? इति जिज्ञासामि ।

**अण्टोनियः** सखे ! सुष्ठु जानासि यत्-

ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥

अपि च, सा युवती यदि धनपतिम् एव परिणिनीषति, क्व अस्ति पृथग्जनस्य त्वादृशस्य अवकाशः ?

**बेस्सानियः** यदि सा न केवलं लावण्यवती, अपि तु शीलवती बुद्धिमती च भवेत् तदा नूनं सा न कोट्यधिपतिं परिणिनीषेत् । किन्तु विवेकिनं शीलसम्पन्नं च कञ्चित् परिणिनीषेत् खलु ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अण्टोनियः** तर्हि कृतं धनेन । निर्धनः अपि युवा तादृशीं युवतीं परिणेतुं प्रभवति ।

**बेस्सानियः** आम् आम् सखे !, तथा अपि सुविदितम् इदम्-

"रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय" ॥

किं च, निकटवर्तिनि बेल्माण्ट्नगरे निवसन्तीम् अतिलावण्यवतीं कोट्यधिपतिकुमारीम् अहं परिणेतुम् उत्सुकः अस्मि । तत्र विवाहोत्सव-निर्वहणाय न्यूनातिन्यूनं स्वर्णमुद्राणां सहस्रम् अवश्यम् अपेक्ष्यते। किं वा करवाणि सखे !? केन उपायेन तत् लभेय ? नूनं त्वम् अत्र मे शरण्य इति मन्ये ।

**अण्टोनियः** धननिमित्ता चिन्ता कुतः ? सखे ! उपगच्छ तं वेनिस्-नगरे विश्रुतं शैलाक-नाम-कुसीदकं, यः अवश्यं त्वदपेक्षितं धनम् ऋणरूपेण ते दास्यति। निवेदय तस्मिन् यत् मासत्रयेण एव मम वाणिज्यनौकाः प्रतिनिवर्त्स्यन्ते तदा च ऋणम् अपाकरिष्यते ।

**बेस्सानियः** असंशयं मित्र !, शैलाकः हि प्रभूतधनवान् अस्ति । धनं च मे उपपादयितुं सर्वथा समर्थः अस्ति । किन्तु सः असौ गृध्रापसदः त्वां नितरां द्वेष्टि । यतः हि पुरा त्वं तस्य गृध्रतां लुब्धतां च कटुतया 'निर्घृणी रक्तपिपासुः' इत्यादिकठोरशब्दैः निन्दितवान् असि । सः असौ त्वयि प्रतिकर्तुं सदा प्रयतमानः अस्ति । एवं सति अहं कथं तं धूर्तापसदं धनसाह्याय याचेयम् ?

**अण्टोनियः** मा एवं सखे !, मा अस्तु चिन्ता । लोके सर्वथा दोषरहितान् न एव पश्यामः । तेजस्वी अग्निः अपि धूमेन समावृतः । कान्तम् अपि सुवर्णं कल्मषात् न एव मुक्तम् । राकाचन्द्रमाः अपि कलङ्कं धत्ते । एवं सति कुसीदवृत्तिम् अनुसन्दधत्सु निर्धनेभ्यः स्वार्थलाभाय द्रुह्यत्सु निर्घृणेषु निर्दोषता कथं वा संभवेत् ? न एव खलु ? तत् तम् उपगच्छ शीघ्रम्। इष्टं च साधय ।

★



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## द्वितीयं दृश्यम्

[बेस्सानियः धनसाहाय्यार्थं वेनिसनगरनिवासिनं विश्रुतं कुसीदकं शैलाकम् उपगच्छति ।]

**बेस्सानियः** भोः शैलाक ! देहि मे स्वर्णमुद्राणां सहस्रं धनं ऋणरूपेण ।

**शैलाकः** दास्यामि अवश्यं दास्यामि यद् अपेक्षितं धनम् । कन्याशुल्कनिमित्तं धनम् इष्यते इत्यतः अहं गृहीतस्य धनराशिमात्रस्य मासत्रयावधौ प्रत्यर्पणम् अपेक्षे । न तु वृद्धि(Interest)सहितस्य । मासत्रयावधौ यदि धनं मे न प्रतिनिवर्तयिष्यते तर्हि तस्य ऋणग्रहीतुः शरीरात् एकपौण्ड्-मितं मांसपिण्डं छित्त्वा ग्रहीष्यामि । एतत्समर्थकं लिखितं प्रमाणपत्रं तेन अण्टोनियेन स्वहस्ताक्षरैः अङ्कितव्यम् । अपि एतत् तव सम्मतम् ?

[एतदुग्रं प्राणघातकं प्रमाणपत्रं कथं वा देयम् इति बहुधा चिन्तयन् परिणयातुरः बेस्सानियः सख्युः अण्टोनियस्य गृहं प्रति धावति । तमुपगम्य]

**बेस्सानियः** सखे ! यद्यपि मम धनावश्यकता उत्कटा वर्तते तथा अपि तेन कुसीदकेन यहूदिना शैलाकेन ऋणप्रत्यर्पणविषये यः निर्बन्धः विधित्स्यते यत् - मासत्रयावधौ धनप्रत्यर्पणस्य वैफल्ये जाते तव शरीरात् एकपौण्डमितं मांसपिण्डं छित्त्वा ग्रहीष्यते- इति यत्, तत् मे न एव रोचते । कर्तव्यं किम् अत्र ? इति भ्रान्तः अस्मि मित्र ! ।

**अण्टोनियः** अत्र चिन्ता मा अस्तु मित्र ! । शैलाकेन यद् अपेक्ष्यते तत् पूरयिष्यते - इति तं वद । यतः मच्छरीरात् मांसपिण्डच्छेदनादिकं तु औपचारिकम् एव भविष्यति । तद् गच्छ शीघ्रम् । मद्धस्ताक्षरैः अङ्कनीयं प्रमाणपत्रं गृहीत्वा प्रत्यागच्छ । अन्यथा पोर्षिया हस्तान्तरिता भवेत् । नूनं मासत्रयावधेः पूर्वम् एव षड् अपि मम वाणिज्यनौकाः प्रतिनिवर्त्स्यन्ते । इत्यतः ऋणप्रत्यर्पणविषये न अस्ति का अपि चिन्ता । तद् गच्छ, कार्यं च साधय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अचिराद् एव शैलाकम् उपगम्य यथानिगदितं प्रमाणपत्रम् आनीय अण्टोनियस्य हस्ताक्षरैः अङ्कयित्वा तदाधारेण च शैलाकसकाशात् धनं गृहीत्वा बेस्सानियः अण्टोनियम् उपसर्पति । अनन्तान् च धन्यवादान् तस्मै सुहृत्सखाय व्याहरति ।]

**बेस्सानियः** सखे ! मयि तव सौहार्दं कैः वा शब्दैः वर्णयेयम् ? सत्यम् उक्तं हि बुधजनैः –

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
इष्टं प्रयच्छति च कामधुगेव नूनं
किं किं न साधयति कल्पलतैव सख्यम् ॥

★

## तृतीयं दृश्यम्

[बेल्माण्ट्नगरम् । पोर्षियायाः पाणिग्रहणाय संभावितानां बहूनां स्पर्धा उपस्थिता अस्ति । यतः हि तस्याः पोर्षियायाः दिवङ्गतः पिता कोट्यधिपतिः स्वलिखिते मृत्युपत्रे (will) स्वार्जितं सर्वस्वं धनकनकादिद्रव्यं पोर्षियायै स्वस्य एकमात्रप्रियपुत्र्यै उत्तराधिकारिण्यै प्रादात् । तस्याः पोर्षियायाः प्रचुरधनस्वाम्यं परिलक्ष्य तस्याः पाणिग्रहणापेक्षया समागच्छत्सु अयोग्यान् कन्यापेक्षिणः निवारयितुकामः मृत्युपत्रलेखनसमये विचित्रम् एकं निबन्धनं विहितवान् आसीत्, यत् – "विवाहमण्डपे स्वर्णमयी रजतमयी अयोमयी च इति तिस्रः पेटिकाः लाक्षामुद्रया पिहिताः स्थापयितव्याः । तत्र एकस्याम् एव पेटिकायां पोर्षियायाः भावचित्रं निक्षेसव्यम् । ततः यः कः अपि कन्यार्थी वध्वाः भावचित्रं दधतीं पेटिकां वृणुयात् सः एव तस्याः पतिः भवति ।" इति ।

अथ तत्र पाणिग्रहणसमारोहे प्रवृत्ते प्रप्रथमं मोरक्को-नाम-आफ्रिकीयराष्ट्रस्य राजकुमारः धनपतिसदृशः कोटीश्वरः अभ्यागच्छति । तत्र च प्रतिष्ठापितासु तिसृषु पेटिकासु सः सुपरीक्ष्य स्वेच्छया स्वर्णमयीं पेटिकां वृणोति यस्याः उपरि लिखितम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्ति यत् 'यः मां गृह्णाति सः सर्वं स्ववाञ्छितं प्राप्नोति' इति । अथ उद्घाटितायां तस्यां पेटिकायां मृतकस्य भग्नकपालकर्परं (Skull) 'न खलु कान्तं सर्वं काञ्चनं भवति' इति लिखितपत्रसहितम् उपलभ्य राजकुमारः हताशः खिन्नचित्तः यथागतं प्रतिनिवर्तते । सा च पेटिका पुनः पिधाय यथापूर्वं संस्थाप्यते ।

अथ अन्यः राजकुमारः आरगेन्द्रः नाम कन्याकाङ्क्षी तत्र उपस्थितः । सः असौ सर्वतः निपुणं समीक्ष्य रजतमयीं पेटिकां वृणोति यस्याः उपरि लिखितम् अस्ति यत् 'यो मां वरयति सः यद् अर्हति तद् गृह्णाति' इति । उद्घाटितायां च तस्यां पेटिकायां 'लोके बहुशः दृश्यते यत् रजतकवचस्य अभ्यन्तरे मूर्खः तिष्ठति' । इति लिखितेन पत्रेण सह विदूषकस्य एकस्य कृत्रिमं शिरः (मुखपटं) सम्प्राप्य भग्नस्वाभिमानः लोकैः च अपहसितः सन् खिन्नः खिन्नः सः असौ राजकुमारः प्रतिनिवर्तते । सा च पेटिका पिधाय पुनः अपि यथास्थानं स्थाप्यते ।

अथ तदनु बेस्सानियः कन्याकाङ्क्षी तत्र समभ्यगात् । तदा-]

**पोर्षिया:** (सखीमुद्दिश्य) पश्य सखि ! मम शोचनीयां स्थितिम् । यतः हि मत्पित्रा विहितेन अनेन निर्बन्धेन न अहम् अत्र मदिष्टं मदभिलषितं च वरं वरयितुं लब्धावकाशा अस्मि ।

**सखी** मा एवं सखि ! । त्वत्पित्रा तव हितैषिणा नूनं तव अभिलषितवरस्य सम्पादनाय साधकतमा व्यवस्था विहिता अस्ति ।



बेस्सानियः सर्वतोऽवलोक्य अयोमयीं पेटिकामवृत ।

[इतः बेस्सानियः सर्वतः अवलोक्य सहजसरलजीवनपरायणस्वभावत्वात् अयोमयीं पेटिकां वरयति यस्याः उपरि 'यः मां काङ्क्षति सः स्वायत्तं सर्वस्वं त्यजेत् - समर्पयेत्' इति लिखितम् अस्ति । पेटिकाम् उद्घाट्य तत्र च पोर्षियायाः भावचित्रम् उपलभ्य हर्षपुलकितः सः तत्र एव पोर्षियायाः पाणिग्रहणं करोति । ततः नूतनवध्वा समेतः सः वेनिसनगरं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समागच्छति।

बेस्सानियः स्वर्णपुत्थलीसदृश्या पोर्षियया सह सुखं निवसति। अथ एकदा कुतश्चित् आगतं पत्रम् एकं पठित्वा सः दिग्भ्रान्तः निस्तेजस्कः स्तब्धः च सञ्जातः। तादृशं तं वीक्ष्य-]

**पोर्षिया** (सकुतुकं) नाथ ! अहं ननु तव सहधर्मिणी। अतः यद् अपि स्यात् नाम तत्र पत्रे, मह्यम् अपि तत् श्रावय। या भर्तुः सुखे दुःखे च समानम् एव सहभागित्वं वहति सा एव सहधर्मिणी भवितुम् अर्हति। आवयोः मध्ये परस्परं गूहनीयः विचारः संभवेत् वा कदाचित् ? अतः आवेदय पत्रलिखितम्।'

**बेस्सानियः** प्रिये ! अत्र पत्रे काचित् अनिष्टतमा वार्ता पठिता। यत् - अण्टोनियस्य षड् अपि वाणिज्यनौकाः बहुमूल्यसामग्रीभृताः समुद्रमध्ये चक्रवातग्रस्ताः सन्त्यः निमग्नाः। ताभिः सह अण्टोनियस्य धनादिसर्वस्वम् अपि विनष्टम्। इदानीं कथम् अहं गृध्रकुसीदकं शैलाकं निभालयानि ? सः हि निर्घृणः निष्ठुरस्वभावः अण्टोनियस्य प्रतीकारसाधनाय नितरां प्रयत्नरतः अस्ति। अण्टोनियं सः परमशत्रुं मन्यते। यतः पूर्वं तस्य शैलाकस्य एकमात्रपुत्री जेस्सिकानाम्नी तेन कृच्छ्रेण सञ्चितं धनकनकादिकं यथेच्छम् अपहृत्य अण्टोनियस्य सखायं लोरेन्जो इत्यने परिणीय तेन सह लोकविहाराय निर्जगाम। तत्प्रभृति शैलाकः उन्मत्तः इव वेनिस्-नगरवीथिषु सोद्वेगं अश्रूणि मुञ्चन् स्वोरसि प्रहरन् विकीर्णकेशः पथिकान् उद्दिश्य 'अन्वेषयत गृह्णीत तां मे दुष्टपुत्रीं, प्रापय मे ततः मम कृच्छ्रार्जितं धनम्' इत्यादि प्रलपन् परिभ्रमति। तथा इतः जेस्सिकाः लोरेन्जोदम्पत्योः अण्टोनियेन सह स्नेहसम्बन्धः सर्वथा विजृम्भते। एवं सति कथं वा शैलाकः अण्टोनियं क्षमते ? न एव खलु ? वैरेण तस्मै मन्मित्रस्य अण्टोनियस्य प्रतीकारम् एव साधयिष्यति सः। धिङ् मां मित्रविश्वासघातिनम्। तथा मम परमसुहृत्सखम् अण्टोनियम् एवं दुःखसागरे निमज्जय्य कथं वा जीवेयं प्रिये !? [दूयमानचित्तः सः तिष्ठति। पोर्षिया च तं यथामति सान्त्वयति।]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थं दृश्यम्

वेनिस्-नगरे राजसौधः ॥
ड्यूक्-नरेशः सिंहासनारूढः ॥

[शैलाकः अण्टोनियस्य नौकादुरन्तम् आवेदितः भृशम् उद्विग्नः, अण्टोनियेन नष्टसर्वस्वेन ऋणप्रतिनिवर्तनं सर्वथा अशक्यम् अतः वैरस्य निर्यातनं साधयिष्यते मया इति हृष्टः च अण्टोनियं विरुद्ध्य न्यायालये न्यायदानाय ड्यूक्-नरेशम् अभ्यर्थयितुं मनः कृत्वा-]

**शैलाकः** प्रभो ! सम्राजम् अभिवादये । अण्टोनियः मत्तः गृहीतं स्वर्णमुद्रासहस्रमितं धनं प्रतिश्रुतानुसारं मासत्रयावधौ न एव प्रत्यार्पयत् । अतः प्रभो ! प्रमाणपत्रे प्रतिज्ञातानुसारं तस्य शरीरात् पौण्डमितं मांसपिण्डं छित्त्वा जिघृक्षामि ।

**ड्यूक्नरेशः** भोः भोः शैलाक ! न एतद् युक्तं भवदध्यवसितं क्रूर-निर्घृणकृत्यम् । कृपया काञ्चित् दयां धेहि तस्मिन् निःसहाये वराके । ननु प्रकृतिकोपनिमित्तं ऋणप्रत्यर्पणासामर्थ्यं तस्य अण्टोनियस्य समापन्नं, एतावता न असौ महान् अपराधः भवति । तथा त्वं सुष्ठु जानासि यत् '**धनेन दानवः दयया मानवः**' इति बुधजनबोधितां शीलसंहिताम् । धनं नाम भोगस्य साधनमात्रं न तु तद् एव मानवस्य परमपुरुषार्थः । अतः यत् किञ्चित् धनं तेन प्रत्यर्पयिष्यमाणं गृहीत्वा सन्तुष्टः भव । किन्तु तस्य वराकस्य शरीरात् मांसपिण्डच्छेदनेन तस्य प्राणहरणात् विरम् भोः !

**शैलाकः** न प्रभो ! न एव । न अहं द्विगुणं त्रिगुणं वा, शतगुणं सहस्रगुणं वा अपि धनम् अभिलषामि । केवलं मद्वैरिणः शरीरात् पौण्डमितं मांसपिण्डं विहाय न अन्यत् किञ्चिद् वरये ।

**ड्यूक्नरेशः** भोः ! आत्मा हि सर्वान्तर्यामी, एकः एव विभिन्न इव दृश्यमानेषु प्राणिदेहेषु, मणिगणेषु सूत्रम् इव, वृक्षस्य विभिन्नशाखा-पर्ण-पल्लव-प्रसूनेषु रसः इव, तरङ्ग-फेन-बुद्बुदादिषु सलिलम् इव विराजते । यथा शरीरहिंसनं प्राणघातनं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

च मम अप्रियतया अनुभूयते तथा एव तद् अन्येषाम् अपि । 'यत् च मम अप्रियं तत् अहं कस्य अपि उपरि न एव कुर्याम्' इति हि शीलसंहितायाः स्वर्णनियमः । स्वान्तःशान्ति कामयमानः हि सर्वेषु-यावद्-अपकारिषु अपि प्रियम् एव समाचरेत् न तु वैराणि साधयेत् ।

**शैलाकः** प्रभो ! भवदुक्तं सर्वम् अपि सत्यम् एव । किन्तु अहं मद्वैरिणः शरीरात् मांसपिण्डच्छेदनाद् ऋते न अन्यत् किम् अपि इच्छामि । अयं हि मदर्थं सुवर्णावसरः अस्ति । तं कथम् अहं विफलीकुर्याम् ?

[ड्यूक्-नरेशः एवं दुरध्यवसायिनं शैलाकं दृष्ट्वा खिन्नः किञ्चित् विचिन्तयति । ततः स्वीयान् अधिकारिणः आज्ञापयति यत्- 'कञ्चित् दक्षं न्यायनिर्णयनिपुणं न्यायमूर्तिपदनिर्वहणसमर्थं न्यायवादिनं विचिन्वन्तु' इति । अधिकारिणः सर्वत्र नगरे तादृशं विचक्षणम् अन्वेषयितुम् आरब्धाः तावद् एव कश्चन वार्ताहरः सेवकः ड्यूक्-नरेशाय 'कश्चित् समर्थः न्यायवादी नगरान्तरात् समागतः एतत्कार्यार्थं समुपस्थितः अस्ति' इति न्यवेदयत् । ड्यूक्-नरेशेन तत्क्षणम् एव सः अन्तः आकार्य न्यायमूर्तित्वेन चितः । सः च तौ उभौ अपि वादि-प्रतिवादिनौ शैलाक-अण्टोनियौ उद्दिश्य 'युवयोः यत् किञ्चिद् वक्तव्यम् अस्ति तत् निवेदयतम्' इति कथयित्वा स्वयम् एव तावत् शैलाकस्य हस्ते स्थितं प्रमाणपत्रं अण्टोनियशरीरात् मांसच्छेदनाय अपेक्षितां छुरिकां तुलादण्डं च परिलक्ष्य वदति-]

**न्यायमूर्तिः** हे शैलाक ! इदानीम् अपि अवकाशः अस्ति अण्टोनियं संकटग्रस्तं क्षन्तुम् । यद्यपि त्वं न्यायदानम् एव वाञ्छसि तथा अपि श्रेष्ठः मार्गः तु क्षमायाः एव । दयया एव मानवः भवति निर्दयः तु दानवः एव इति बुध्यस्व । दया हि दयालुं दयापात्रं च इति उभौ अपि नन्दयति । साक्षात् करुणाघनः ईश्वरः स्वयम् एव दयालुं क्षमाशीलं च सर्वसम्पदा अनुगृह्णाति । तदभीष्टं च सर्वं प्रदत्ते । अतः तस्मिन् श्रद्धत्स्व सौम्य !, जहि निष्ठुरतां दयां च भजस्व अण्टोनिये । न्यायदानं (Justice) सर्वैः अपेक्ष्यते इति अत्र न काचित् विप्रतिपत्तिः अस्ति तथा अपि दया (mercy) तु ततः अपि ज्यायसी । (तावता-)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बेस्सानियः** न्यायमूर्तिमहोदय ! इदम् इह गृह्णातु तत्प्रदत्तस्य दशगुणं धनं मन्मित्रं च मोचयतु सः ।

**न्यायमूर्तिः** पश्य पश्य भोः शैलाक !, बेस्सानियः त्वया दत्तस्य दशगुणितं धनं प्रयच्छति । तत् स्वीकुरु । येन प्रकरणम् इदम् अत्र एव समाप्यताम् । उभयोः समाधानं च जायताम् । तत् प्रतिज्ञापत्रम् एतत् छित्त्वा शकलीकुरु प्रक्षिप च । अधुना तेन पत्रेण किम् अपि कृत्यं न अस्ति । मैत्री दया प्रेम विश्वासः च यत्र विद्यन्ते तत्र पत्रेण किम् ? प्रमाणेन च अपि किम् ?

(शैलाकः तु सर्वथा न अनुमन्यते समाधानार्थम् । तदा)

**न्यायमूर्तिः** (अण्टोनियम् उद्दिश्य) भोः ! त्वया हस्ताक्षरैः अङ्किते प्रमाणपत्रे यत् प्रतिश्रुतं तद् अनिवार्यतया तावत्याम् अवधौ त्वया दातव्यम् एव भवति । तत्र तव अशक्तौ तु शैलाकः यदि त्वां क्षान्त्वा विमोचयितुं न अपेक्षते न च अनुमन्यते तर्हि प्रतिश्रुतानुसारं छिन्नशरीरस्य तव पौण्डमितं मांसं त्वया अवश्यं प्रदेयम् । न अन्यं मार्गं एतेन विना न्यायमार्गे पश्यामि ।

**शैलाकः** (छुरिकां भ्रामयन्) हं हो ! देवसदृशः अयं न्यायमूर्तिः कथं कैः वा शब्दैः अभिनन्द्यताम् ? नूनं मदनुग्रहाय एव अवतीर्णः अस्ति अयम् । न अत्र विद्यते सन्देहलेशः अपि । (हर्षेण केकायते ।)

**न्यायमूर्तिः** (अण्टोनियम् उद्दिश्य) भोः ! सिद्धः भव, अपसारय तव परिधानम् । सुष्ठु प्रदर्शय तव वक्षःस्थलं यस्मात् शैलाकः यथाभिलषितं पौण्डमितं मांसपिण्डं छित्त्वा गृह्णीयात् ।

(एतच्छ्रवणेन)

**शैलाकः** हं हो ! मम भाग्यविधात्रे न्यायमूर्तये भूयांसि नमांसि हार्दिकानि च अभिनन्दनानि !

**न्यायमूर्तिः** (एतावता अपि धीरं हसन्मुखं तथा ईषद् अपि अविचलितम् अण्टोनियं पुनः अपि उद्दिशन्-) कुतः विलम्बः भोः अण्टोनिय ! ? प्रदर्शय एतस्मै तव वक्षः येन यथाभिमतं मांसखण्डं छिनत्तु एषः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(अण्टोनियः परिधानम् अपसार्य वक्षःस्थलं प्रदर्शयति ।)

**न्यायमूर्तिः** (शैलाकम्) वक्षःस्थले कस्मात् स्थानात् त्वं मांसं जिघृक्षसि शैलाक ! ? वद तावत् ।

(पार्श्वस्थे दृषदि छुरिकां निशातयन् तुलां च तोलनाय समीकुर्वाणः)

**शैलाकः** हुं ! तस्य हृदयस्य निकटतमवर्तिनः स्थानात् एव छित्त्वा मांसं जिघृक्षामि ।

(मांसच्छेदनाय अण्टोनियम् उपसर्प्य बद्धवैरं तं द्वेषपूर्णनेत्राभ्यां वीक्षते ।)

**न्यायमूर्तिः** शैलाक ! तिष्ठ तावत् । अपि त्वं वैद्यवर्यम् अपि अत्र उपस्थापितवान् असि वा ? यतः हि मांसच्छेदनेन असौ रुधिरनिःसरणेन प्राणान् मा जह्यात् ।

**शैलाकः** (उत्तेजितः सन्) न न ! वैद्यवर्यस्य उपस्थितिम् आश्रित्य प्रमाणपत्रे न किञ्चित् अपि लिखितम् अस्ति । अतः वैद्येन किम् ?



शैलाकः - प्रमाणपत्रे न किञ्चित् लिखितमस्ति । अतो वैद्येन किम् ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न्यायमूर्तिः** अण्टोनिय ! सन्निहितः तव अन्तिमः क्षणः । इति अतः त्वां पृच्छामि यत् 'अपि अस्ति तव किञ्चित् निवेदयितव्यम् ?'

(अण्टोनियः सुहृन्मित्रं बेस्सानियं प्रेमप्लावितहृदयः समालिङ्ग्य आपृच्छन्)

**अण्टोनियः** स्वस्ति अस्तु ते सखे ! अनुजानीहि माम् । त्वदर्थं तव कल्याणाय प्राणान् समर्पयितुं सानन्दं सिद्धः अस्मि । परोपकारार्थम् इदं शरीरं खलु ?

**न्यायमूर्तिः** आगच्छ शैलाक ! गृहाण अपराधिनः शरीरात् तव अभीप्सितं मांसपिण्डम् । न्यायसंहिता इदम् अनुशास्ति न्यायालयः च तद् अनुमन्यते ।

(शैलाकः छुरिकां तुलादण्डं च गृहीत्वा झटिति अण्टोनियस्य अभिमुखं गच्छति । तावता न्यायमूर्ति तं सहसा निरुन्धन् )

**न्यायमूर्तिः** तिष्ठ तावत् शैलाक ! अत्र किञ्चिद् अवधेयम् अवशिष्यते । प्रमाणपत्रे तु मांसपिण्डस्य केवलस्य ग्रहणम् अनुज्ञातम् अस्ति, न तु रुधिरस्य बिन्दुमात्रस्य अपि । मांसम् अवश्यं गृहाण किन्तु यदि नाम त्वं तस्य अपराधिनः शरीरात् बिन्दुमात्रम् अपि रुधिरं निःस्रावयिष्यसि तर्हि तव सर्वम् अपि धनं स्वायत्तं च द्रव्यसर्वस्वं राज्यकोशस्य स्वायत्तीभविष्यति, अतः त्वया अत्र सावधानेन भाव्यम् ।

**बेस्सानियः** (हृष्टः सन् केकायते) अहो ! मे भाग्यदेवता अद्य न्यायमूर्तिरूपेण उपस्थिता ।

**न्यायमूर्तिः** त्वं न्यायम् एव अपेक्षिष्ठाः शैलाक !, न्यायं गृहाण अधुना ।

**शैलाकः** (स्तब्धीभूतः दिङ्मूढः च सन्) भोः भोः बेस्सानिय ! मा अस्तु मत्तः गृहीतस्य धनस्य दशगुणितं धनम् । त्रिगुणितेन एव संतुष्ये, अतः देहि तावद् एव धनम् ।

**न्यायमूर्तिः** त्वरा मा अस्तु यहूदिवर्य ! यदा बेस्सानियेन धनम् उपहृतं तत् त्वं तदा एव निराकार्षीः । अतः त्वं न्यायमात्रम् एव ग्रहीतुम् अनुज्ञास्यसे । न्यायं मुक्त्वा न किञ्चिद् अपि अन्यद् द्रव्यं ते लप्स्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शैलाकः** (भयभ्रान्तः) मा अस्तु त्रिगुणम् अपि भोः !, देहि मे गृहीतमात्रं मद्धनम्। तेन एव सन्तुष्टः अस्मि ।

**न्यायमूर्तिः** सकृत् निराकृतस्य धनस्य पुनः ग्रहणाय न अस्ति न्याये अवकाशः । अतः तत् न अनुज्ञायते । अपरं च अपि किञ्चिद् अत्र कर्तव्यम् अवशिष्यते शैलाक ! । वेनिस्-राज्यशासनानुसारं यदि कश्चित् स्वयं वेनिस्-राज्यस्य प्रजाजनः न भवति किन्तु विदेशीयः भवति, यदि च सः वेनिस्-राज्यसत्कस्य कस्यचित् प्रजाजनस्य प्राणान् अपजिहीर्षति तर्हि असौ मृत्युदण्डम् अर्हति । अपि च तस्य धनं सर्वा अपि सम्पत् च राज्यकोशस्य हन्यमानस्य च समभागेन वितीर्यते ।

त्वं हि न वेनिस्-राज्यस्य प्रजाजनः । तथा त्वं वेनिस्-प्रजाजनं अण्टोनियं हन्तुम् उद्यतः असि ।

[न्यायवितरणं वीक्षमाणं न्यायाध्यक्षं ड्यूक्सम्राजम् उद्दिश्य]

प्रभो ! अत्र प्रकरणे अपराधस्य दण्डसंहितानुसारं विधातव्यं दण्डम् अहं निरूपितवान् अस्मि । किन्तु निर्णयः तु भवता एव देयः । भवत्सम्मतः दण्डः एव अस्मै दीयताम् ।

(एतच्छ्रवणेन भयभीतं शैलाकम्-)

**ड्यूक्-नरेशः** भोः भोः शैलाक ! मा भैषीः, सम्भावितस्य सज्जनस्य अण्टोनियस्य विषये या दया त्वया निदर्शिता ततः अपि अधिकां दयाम् अहं त्वद्विषये निदर्शयामि । अतः मृत्युदण्डनात् मया त्वं विमोचितः असि । परं तव सर्वस्वं स्वायत्तं धनं त्वया अण्टोनियाय राज्यकोशाय च समर्पयितव्यम् ।

(एतत् श्रुत्वा हतसर्वस्वः शैलाकः स्तब्धः सर्वथा निहतप्रायः च भवति । धनजीवी कुसीदकः धनं विना किं वा करोति ? सः अयं जीवच्छव एव ।)

**शैलाकः** (उच्चैः आक्रन्दन्) समतिष्ठत । किम् अनेन मे जीवनेन ? नष्टधनस्य मम



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणैः किं वा साधनीयम् ? मम प्राणान् अपि गृह्णीध्वम् ।

**न्यायमूर्तिः** (अण्टोनियम् उद्दिश्य) भोः ! सद्यः तस्य यहूदिनः शैलाकस्य धनकनकादिसर्वस्वं त्वदधीनं भविष्यति । सः अयं क्रूरः निष्करुणः अधुना नष्टसर्वस्वः सञ्जातः । किन्तु त्वं यदि इच्छसि तर्हि अस्मिन् दयां विधातुम् अर्हसि ।

**अण्टोनियः** (खिन्नं दीनं च शैलाकं दृष्ट्वा करुणया) प्रभो ! न अहं तस्य धनकनकादिकं द्रव्यं वाञ्छामि । तत् मया अयं तस्मात् निर्णयात् प्रतिनिवर्त्यते यदि असौ मत्कृतं समयम् एकं सम्मंस्यते । यथा- स्वजीवितकाले कामं सः नैजं सर्वस्वं स्वायत्तम् उपभुज्यताम् । किन्तु स्वस्य मरणशासने (will) तेन "सर्वस्वं मम धनं मम मरणानन्तरं मत्पुत्र्यै जेस्सिकायै तत्पतये लोरेन्जो-इत्यस्मै च प्रदातव्यम्" इति सुस्पष्टं लेखितव्यम् ।

**न्यायमूर्तिः** अपि तुष्टः असि शैलाक ! ? अपि सम्मतः तव अयं समयः ?

**शैलाकः** आम् आम्, सर्वथा सम्मतः अयं समयः मम । अथ कृपया इतः अहं निर्गन्तुम् अनुज्ञायताम् । अन्यत् किञ्चिद् अपि न अपेक्षे । यतः अधुना ज्वरतापः मां किञ्चिद् बाधते । अतः विश्रान्तिम् इच्छामि । तथा यद् अपि मया लेखितव्यं मम मरणशासने (will) तद् अहम् अवश्यं लेखिष्यामि। कृपया प्रेष्यन्तां मे तत्सम्बन्धिपत्राणि ।

[शैलाकः सत्वरं न्यायालयात् निर्गच्छति ।]

## पञ्चमं दृश्यम्

[अण्टोनिय-बेस्सानियौ तस्मै सर्वापदाम् अपहर्त्रे, सर्वसम्पत्प्रदात्रे, सङ्कटमोचकाय, भाग्यविधात्रे च न्यायमूर्तये भूयः भूयः नमांसि अभिनन्दनानि च व्याहरन्तः ।]

**बेस्सानियः** स्वामिन् ! दयालो ! आपृच्छन्तौ आवाम् अनुज्ञायेताम् । पुनः मिलामः । तथा गृह्यतां धनम् इदं यद् अण्टोनियः शैलाकाय अधारयत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[धनम् उपहरति ।]

**न्यायमूर्ति** (निराकुर्वन्) मा मा एवम् । भोः ! न अहं निर्धनः । विपुलं धनं मम विद्यते ।

**बेस्सानियः** तथा अपि यत् किञ्चित् यथाशक्ति उपायनं भवते समर्पयितुकामः अहं प्रभो !

[न्यायमूर्तिः तस्य बेस्सानियस्य प्रसारितहस्ताङ्गुलीनिबद्धां मुद्रिकां दृष्ट्वा ताम् एव मुद्रिकाम् अवमुच्य जिघृक्षति । तेन चकितः बेस्सानियः झटिति स्वहस्तं प्रतिसंहरन्]

मा एवं भोः ! कृपया क्षम्यताम् । सा इयं मुद्रिका अत्यल्पीयसी । ततः अपि अधिकमूल्यम् उपायनं भवते उपपादयिष्यामि ।

**न्यायमूर्तिः** भोः ! न अहम् अन्यम् उपायनम् ईहे । यदि नैजां कृतज्ञतां मयि सूचयितुम् अभिलषसि तर्हि एतद् एव उपायनम् उपहर ।

**बेस्सानियः** (अनन्यगतिकतया) गृहाण भोः ! अभीष्टम् उपायनम् । (मुद्रिकां ददाति ।) (बेस्सानियः अण्टोनियः च प्रतिनिवर्तेते ।)

## षष्ठं दृश्यम्

[बेस्सानियः स्ववध्वाः पोर्षियायाः विरहेन आकुलः यावच्छीघ्रं तां द्रष्टुकामः अण्टोनियेन सह स्वगृहं प्रविशति । पोर्षिया गृहद्वारि एव तौ अभिनन्द्य अन्तर्गृहं प्रवेशयति । तावता पत्युः मुद्रिकाविहीनां रिक्ताम् अङ्गुलीं निपुणं वीक्ष्य-]

**पोर्षिया** नाथ ! क्व सा मुद्रिका या विवाहसमये ते मया उपहृता आसीत् ? क्व तद् अमूल्यम् अङ्गुलीयकं अस्मत्प्रियदाम्पत्यस्मारकम् ?

[दिग्भ्रान्तं निरुत्तरं यथार्थं च वदितुम् अशक्तं मित्रं बेस्सानियं परिलक्ष्य]

**अण्टोनियः** श्रीमति ! अन्यथा मा भावयेथाः । अद्य न्यायालये आवयोः बहूपकारिणे न्यायवादिने तद् अङ्गुलीयकं बेस्सानियेन उपहारीकृतम् अस्ति । तद् अल्पम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपराधं तस्य क्षन्तुम् अर्हसि ।

**पोर्षिया** (अङ्गुलीयकं पत्ये प्रयच्छन्ती अण्टोनियम् उद्दिश्य-) इदम् अङ्गुलीयकं तव मित्राय प्रयच्छ । तथा एनत् प्रणष्टाद् अङ्गुलीयकात् अधिकं सावधानतया रक्षणीयम् इति तं सुष्ठु प्रबोधय ।

[बेस्सानियः अङ्गुलीयकं निपुणं वीक्ष्य 'अहो ! एतत् तु तद् एव यत् न्यायालये न्यायवादिने उपहारीकृतम्' इति प्रत्यभिज्ञाय च विस्मयापन्नः पोर्षियायाः मुखं निरीक्षते । पोर्षिया तं समादधती-]

**पोर्षिया** पश्य पश्य नाथ ! इदं पत्रं, यस्मिन् अहं अण्टोनिय-शैलाकप्रकरणे न्यायवादित्वेन नियुक्ता - इति निर्दिष्टम् अस्ति ।

**बेस्सानियः** (साश्चर्यम्) अहो ! तत्र न्यायालये उपस्थिता मन्मित्रस्य प्राणदात्री सङ्कट-विमोचयित्री, तथा माम् अपि विश्वासघातमहापातकात् रक्षित्री छद्मवेषधृतवती सा त्वम् एव वा ? नूनं सम्भ्रान्तः अस्मि । अहो ! वेषधारणकौशल्यं समयस्फूर्तिसामर्थ्यं च स्त्रीणाम् !!

[हर्षपुलकिताः सर्वे निष्क्रामन्ति ।]

**"धनेन दानवः दयया मानवः" इति भावरूपकं समाप्तम् ॥**

*सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।*
*लोकोऽयं भयमुक्तोऽस्तु सर्वं भवतु मङ्गलम् ॥*

दुःखात्मकेषु विषयेषु सुखाभिमानः
सौख्यात्मकेषु नियमादिषु दुःखबुद्धिः ।
उत्कीर्णवर्णपदपङ्क्तिरिवाऽन्यरूपा
सारूप्यमेति विपरीतगतिप्रयोगात् ।

**(शीलाङ्काचार्यकृतायाम्-आचाराङ्गवृत्तौ)**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मर्म-नर्म

कीर्तित्रयी



**रमेशः** किं तव पत्न्याः कासरोगः निवृत्तः ?

**परेशः** अरे ! एकेन एव वाक्येन मया सः निवारितः ।

**रमेशः** भवान् किम् उक्तवान् ?

**परेशः** अहम् उक्तवान् यत् - 'वार्धक्ये प्राप्ते एव कासरोगः जायते' इति ।

---



**निकुञ्जः** अद्य सायंकाले मया सार्द्धं भोजनग्रहणे भवतः काऽपि आपत्तिः नास्ति इति मन्ये ।

**निलयः** नैव, नैव । प्रत्युत आनन्दः भविष्यति ।

**निकुञ्जः** अत्यन्तं शोभनम् । तर्हि अष्टवादनसमये अहं भवतः गृहम् आगमिष्यामि ।

---

लघुवयस्कः चिन्टुः गृहस्य विद्युद्घण्टिकां रणयितुं वारं वारं प्रयत्नं कुर्वन् आसीत् । किन्तु तत्र सः सफलः न जातः । मार्गेण गच्छता एकेन सज्जनेन तत् दृष्टम् । स तस्य समीपं गतवान्, तं च हस्ताभ्याम् ऊर्ध्वं कृतवान् । तथा च सः बालकः घण्टिकाम् अवादयत् । तदन्तरं च सः बालकः उक्तवान्- ''चलतु, अधुना झटिति पलायनं कुर्याव, अन्यथा, कोऽपि ताडयिष्यति'' इति ।





Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भृत्यः** प्रभो ! भवता मह्यम् अतीव मूर्खसेवकः अर्पितः, तेन सह कथं कार्यं करणीयम् ?

**स्वामी** 'यथा अहं त्वया सह करोमि तथा' ।





**पुरुषः** कथम् अद्यकालीनस्त्रियः पुरुषेभ्यः अधिकबलवत्यः सन्ति ?

**स्त्री** तत्र स्त्रियः प्रति पुरुषस्य दुर्बलता एव कारणम् ।



**शिक्षकः** "आदेशं विना न केन अपि प्रवेशनीयम्" इति बहिः स्पष्टतया लिखितम्, तथा अपि कथं त्वम् अन्तः आगतः ?

**विद्यार्थी** प्रभो ! भवतः आज्ञां ग्रहीतुम् एव आगतः अहम्

**स्त्री** भोः ! भोः ! वैद्यराज ! द्रुतं कुरु, मम पतिः मृत्युशयने वर्तते ।

**वैद्यराजः** श्रीमति ! चिन्तां मा कुरु । अधुना एव अहं तं मृत्युशयनात् मोचयिष्यामि ।





Jain Education International For Private & Personal Use Only www.jainelibrary.org

(कविः एकदा विद्वत्पर्षदि काव्यं पठन् आसीत्। तदा तत्र आगत्य कश्चित् युवा अवदत्)-



**युवा** तव पिता लवणादिकं विक्रीणाति स्म, किन्तु इदानीं त्वया किम् एतत् क्रियते ?

**कविः** भो ! तव पिता अतीव सज्जनः आसीत्, इति अहं जानामि । तथा अपि भवान् कथम् एतादृशः खलु ?



**महिला** (आपणिकम्) भोः ! किमिति भवतः आपणे सर्वाणि अपि फलानि अम्लानि एव विक्रीयन्ते ?

**आपणिकः** महोदये ! कृपया भवत्याः अधरप्रसाधनं (lipstic) प्रमृज्य एव तानि स्वादयतु !!

**मद्यपः** पुत्रक ! मद्यं हि अतीव कुत्सितं वस्तु । पश्य, पुरतः यौ द्वौ स्तम्भौ दृश्येते न वा ? तौ मद्यपानानन्तरं चत्वारः दृश्यन्ते !

**पुत्रः** किन्तु पितः ! तत्र एक एव स्तम्भः अस्ति !!





Jain Education International For Private & Personal Use Only www.jainelibrary.org




**ग्राहकः** मम क्षत्या इयं घटिका स्थगिता इति मन्ये ।

**आपणिकः** का क्षतिः भवता कृता ?

**ग्राहकः** मम हस्तात् प्रमादवशेन इयं घटिका पतिता । इयं मम एव क्षतिः न वा ?

**आपणिकः** न अयं प्रमादः क्षतित्वेन गण्यते । यतः भवान् स्वयम् एव तां न पातितवान् । किन्तु पतनानन्तरं यद् भवता सा गृहीता- तत् तु क्षतिः एव !!



**न्यायवादी** भवता उक्तं यत् "अहम् अशिक्षितः अस्मि" इति । तथा अपि भवान् मम प्रश्नानाम् उत्तराणि सम्यक्तया ददाति । एतत् कथम् ?

**साक्षी** अथ किम् ? भवतः प्रश्नानाम् उत्तरदाने शिक्षायाः का अपि आवश्यकता एव न अस्ति !!



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राकृतम्

# धम्मो न विक्केय

**मुनिकल्याणकीर्तिविजयः**

रयणपुरे नयरे सुमुहो सेट्ठी निवसइ। धणवंतो वि सो कयाइ दइवजोगा निद्धणो जाओ। भोयणमेत्तं पि नत्थि तस्स गिहे। चिंताउलो सो निलाडे हत्थं ठविऊण चिंतेइ। ताव तस्स भज्जा कहेइ - सामिय! केणट्ठेण चिंतं करेसि? जाहि मे पिउगिहं। सो मज्झ जणओ पभूयधणस्स सामी। जं मग्गिहिसि तं दाहिइ। सेट्ठी कहेइ - भो! न गमिस्सं तत्थ। तुज्झ पिया खु अईव किविणो अत्थि। न किंचि वि दाहिइ मज्झ। तया तीए अच्चग्गहेण कहियं जं - तत्थ चेव जाहि, एयाए अवत्थाए सो अवस्सं दाहिइ। तो सेट्ठी तीए अच्चन्तं अग्गहेण कहं कहं पि तत्थ गंतुं अणुमन्नाविओ।

तओ पभाए कस्सइ गिहाओ किंचि अन्नं आणेऊण तीए सेट्ठिस्स संबलं दिन्नं पेसिओ य नियपिउगिहं पइ। सो वि य गच्छंतो अडविं पविट्ठो मज्झण्हे। चिंतइ य-जं - एत्थ चेव कस्स वि रुक्खस्स हेट्ठा उवविसिऊण भोयणं करिस्सामि। जलमवि तत्थालवाले पाइस्सं ति। एवं चिंतेंतो जाव अच्छइ ताव तेण अट्ठमभत्तस्स पारणट्ठं नीहरिओ मुणी दिट्ठो। तं दट्ठुं हरिसिओ एस मुणिं निमंतिऊण फासुयअन्नदाणेण पडिलाभियवंतो। जइ वि तस्स छुहा नोवसंता तहा वि मुणिदाणस्स आणंदेण सो छुहादुक्खं पि विम्हरिउं जलपाणेण चेव तित्तो ससुरगिहं पइ पत्थिओ।

एत्थंतरे ससुरस्स कुलदेवया नियनाणबलेण एयं वित्तंतं जाणिऊण ससुरं कहेइ-जं - तुज्झ जामाया निद्धणो होऊणं धणं मग्गेउं एत्थ आगमिस्सइ। तेण उ आगच्छंतेण अईव उत्तिमो धम्मो आयरिओ। अओ जया सो तुज्झ सयासे धणं मग्गेज्ज तया तं कहेज्ज जं - "एत्थ आगच्छंतेण तए जो धम्मो कओ तं जइ मज्झ दाहिसि तो तुज्झ धणं दाहिमि" त्ति। जओ तेण धम्मेण तुज्झ पभूयं पुण्णं तप्पभावेण य विउलं धणं पाविस्सइ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयं ससुरस्स अईव रुइयं । अओ जया जामाया आगओ तया तं जहोचियं सक्कारिऊणं भोयणाइ कारावियं । तओ कहियं जं – "एत्थ आगच्छंतेण तए जो धम्मो कओ तं मज्झ देसु जहिच्छियं धणं च गहेसु ।"

सो कहेइ जं – धणस्स अट्ठाए धम्मो न चेव विक्केयव्वो । अहं किं पि नेच्छामि । तओ सो ससुरगिहाओ नीहरिऊण रित्तहत्थो चेव नियगिहं गंतुं पवुत्तो । मग्गे गच्छंतो चिंतइ य जं – एमेव कहं गमिस्सं ? सा मज्झ भज्जा तज्जिस्सइ । अओ किं पि गहिऊण गम्मइ ।

एत्थंतरे तेण नईतीरे पडिया विविहवण्णजुया उवलखंडा दिट्ठा । तो तेसिं चेव उवलखंडाणं पोट्टलियं बंधेऊण गच्छंतो सो गिहं पत्तो । अह तेण जो मुणिदाणरूवो धम्मो कओ आसी तस्स पभावेण वणदेवयाए ते सव्वे वि उवलखंडा रयणत्तणेण परियट्टिया । एसो उ तं न जाणंतो पोट्टलियं भज्जाए समप्पेऊण सिणाणं काउं गओ। सा वि – "मह पियरेण अवस्सं किंचि धणं दिन्नं" ति चिंतेंती तं पोट्टलियं उग्घाडिऊण पेच्छइ ताव रयणाइं दिट्ठाइं ।

ताइं दट्ठुं अईव हिट्ठा सा पइं आकारिऊण कहेइ – सामिय ! पेच्छ, मज्झ जणओ खु न किविणो, अवि य उयारो वच्छलो य । ममं वयणं सच्चं जायं । तेण अम्हाणं बहुं धणं दिन्नं अत्थि । तुज्झ वीसंभो चेव नासी । तह वि एयं सच्चवियं ति ।

तो सेट्ठी ताइं रयणाइं पेच्छिऊण विम्हिओ नियदाणधम्मं सरंतो, हसिऊण कहेइ–भो ! जइ तव जणयवयणं अणुसरंतो हं, तो एयप्पमाणं धणं कया वि न पावेंतो ।

सा पुच्छेइ – कहं तं ?

तया सेट्ठिणा सव्वो वि मुणिदाणमाई वित्तंतो तीसे कहिओ कहियं च–जं–

**धम्मेण पाविया लच्छी धम्मेण पावियं सुहं ।**
**अणिच्चे एत्थ संसारे धम्मो परमबंधवो ।।**

—o—



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org